Digitized by Arya Samaj Foundation Chennai and eGangotri

२८०
९२८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८७०
१८८

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय

विषय संख्या ______ आगत नं० ५२,७१०

लेखक ______

शीर्षक साहित्यकुसुमाञ्जलिः

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

गुरुकुल कांगड़ी विश्वविद्यालय
कृपया पुस्तक के ऊपर कोई निशान आदि
न लगायें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३३,११७ ३३११७

पुस्तकालय

कांगड़ी विश्वविद्यालय, हरिद्वार

८७० / १८८ आगत संख्या ३३,११७

ण की तिथि नीचे अंकित है। ...
यह पुस्तक पुस्तकालय में वापस आ जानी
पैसे प्रति दिन के हिसाब से विलम्ब दण्ड

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SÁHITYA-KUSUMÁNJALI

EDITED AND PUBLISHED BY

PANDIT GOBINLAL KAVIRATNA, B. A.

BOARD OF EXAMINERS, COLLEGE OF FORT WILLIAM.

साहित्यकुसुमाञ्जलिः

फोर्ट उइलियम-कलेजस्य परीक्षकेण वि. ए. उपाधिधारिणा

पण्डित-गोविन्दलाल-कविरत्नेन

सङ्कलितः प्रकाशितश्च

पुस्तकालय
गुरुकुल कांगड़ी

कलिकाता

गिरिश-विद्यारत्न-यन्त्रे

श्रीशशिभूषण कविरत्न-भट्टाचार्य्येण मुद्रितः।

CHECKED 1973

Initial

TO BE HAD OF

THE SANSKRIT PRESS DEPOSITORY

30, CORNWALLIS STREET, CALCUTTA.

870,187

33917

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

PREFACE.

In preparing this Sanskrit chrestomathy great care has been taken to choose such pieces of prose and poetry from the moral, epical and legendary literature in Sanskrit, as are calculated to prove both interesting and instructive to the students for whom it is intended. The text is edited with due regard to simplicity and elegance of style, and of the passages having various readings only the best and the most reasonable version has been adopted. Obscenity of language and that even of ideas have been avoided with a religious scruple. Among the authoritative editions from which the text has been mostly taken, mention may be made of Io. Godofr Ludov Kosegarten's Pañchatantra, Francis Johnson's Hitopadeśa, Gaspare Gorresio's Rámáyaṇa, the Márkaṇḍeya Puráṇa published by the Asiatic Society of Bengal, and the Mahábhárata edited by the learned Paṇḍits of the Education Committee in 1834.

College of Fort William,
Calcutta, the 21st May 1900. } G. Kaviratna.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूचीपत्रम् ।

विषयः	पृष्ठे
पञ्चतन्त्रम्—	
लब्धप्रणाशः	१
हितोपदेशः—	
वीरवरोपाख्यानम्	३०
रामायणम्—	
सगरवंशोपाख्यानम्	३५
मार्कण्डेयपुराणम्—	
हरिश्चन्द्रोपाख्यानम्	४३
पद्मपुराणम्—	
शिविराजोपाख्यानम्	६८
महाभारतम्—	
सावित्र्युपाख्यानम्	७४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहित्यकुसुमाञ्जलिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चतन्त्रम् ।

लब्धप्रणाशः ।

अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बूपादपः सदाफलः। तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। अथ तस्य तरोरधस्तात् कदाचिद्विकरालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमलबालुकासनाथे तीरोपान्ते न्यविशत्। ततश्च रक्तमुखेन स प्रोक्तः, भो भवान् समभ्यागतोऽतिथिः, तद्भक्षयतु मया दत्तान्यमृततुल्यानि जम्बूफलानि। उक्तञ्च—

प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा।
वैश्वदेवान्तमापन्नः सोऽतिथिः स्वर्गसङ्क्रमः॥ १॥

न पृच्छेच्चरणं गोत्रं न च विद्यां कुलं न च।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत्॥ २॥

दूरमार्गश्रमश्रान्तं वैश्वदेवान्तमागतम्।
अतिथिं पूजयेद्यस्तु स याति परमां गतिम्॥ ३॥

अपूजितोऽतिथिर्यस्य गृहाद्याति विनिश्वसन्।
गच्छन्ति विमुखास्तस्य पितृभिः सह देवताः॥ ४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमुक्त्वा तस्मै जम्बूफलानि प्रददौ। सोऽपि तानि भक्षयित्वानेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वभवनमगात्। एवं नित्यमेव तौ वानर-मकरौ जम्बूच्छायाश्रितौ विविधसाधुगोष्ठ्या कालं नयन्तौ सुखेन तिष्ठतः। सोऽपि मकरो भक्षित-शेषाणि जम्बूफलानि गृहं गत्वा स्वपत्न्याः प्रयच्छति। अथ तयान्यस्मिन्नहनि स पृष्टः, नाथ, क्वैवंविधान्यमृतकल्पानि नित्यं प्राप्नोषि। सो-ऽब्रवीत्, भद्रे, ममास्ति प्रियसुहृद्रक्तमुखो नाम वानरः। स प्रीतिपूर्व्वमिमानि फलानि प्रयच्छति। अथ तयाभिहितं, यः सदैवामृतप्रायाणीदृशानि फलानि भक्षयति, तस्य हृदयममृतमयं भविष्यति। तद्यदि मया भार्य्यया ते प्रयोजनं, ततस्तस्य हृदयं मम प्रयच्छ, येन तद्भक्षयित्वा जरामरणरहिता त्वया सह भोगान् भुनज्मि। स आह, भद्रे, मा मैवं वद, यतः स प्रतिपन्नोऽस्माकं भ्राता, अपरं फलदाता, ततो व्यापादयितुं न शक्यते। तत् त्यजैनं मिथ्या-ग्रहम्। उक्तञ्च—

एका प्रसूयते माता द्वितीया वाक् प्रसूयते।
वाग्जातमधिकं प्रोचुः सोदर्य्यादपि बन्धुवत्॥ ५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मकरी आह, त्वया कदाचिदपि मम वचनं नान्यथा कृतं. तत् किं मया प्रोक्तोऽपि तं न व्यापादयसि। अथ स यदि मर्कटः, तत् कस्तेन सह तव स्नेहः। तत् किं बहुना, यदि तस्य हृदयं न भक्षयामि, तदा तवोपरि प्रायोपवेशनं कृत्वा प्राणांस्त्यक्ष्यामि। एवं तस्यास्तन्निश्चयं ज्ञात्वा चिन्ताव्याकुलितहृदयः स प्रोवाच। अहो साध्विदमुच्यते—

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च।
एको ग्रहस्तु मीनानां नीलीमद्यपयोस्तथा॥ ६॥

तत् किं करोमि. कथं स मे वध्यो भवति, इति विचिन्त्य वानरपार्श्वमगमत्। वानरोऽपि चिरात्तं सोद्वेगमवलोक्य प्रोवाच, भो मित्र, किमद्य चिरवेलया समायातोऽसि, कस्मात् साह्लादं नालापयसि, न च सुभाषितानि पठसि। स आह, मित्र, अद्याहं तव भ्रातृजायया निष्ठुरतरैर्वचनैरभिहितः, भो कृतघ्न, मा मे त्वं स्वमुखं दर्शय, यतस्त्वं प्रतिदिनं मित्रमुपजीवसि; न च तस्य पुनः स्वगृहद्वारदर्शनेनापि प्रत्युपकारं करोषि, तत् ते प्रायश्चित्तमपि नास्ति। उक्तञ्च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥७॥

तत् त्वं मम देवरं गृहीत्वाद्य प्रत्युपकारार्थं गृहमानय। नो चेत् त्वया सह परलोके मे दर्शनम् । तदहं तयैव प्रोक्तस्तव सकाशमागतः । तदद्य तया सह त्वदर्थे कलहायतो ममेयती वेला विलग्ना । तदागच्छ मे गृहं, तव भ्रातृपत्नी रचित-चतुष्का प्रगुणितवस्त्रमणिमाणिक्याद्युचिताभरणा द्वारदेशबद्धवन्दनमालिका सोत्कण्ठा तिष्ठति । मर्कट आह, भो मित्र, युक्तमभिहितं मद्भ्रातृपत्न्या । उक्तञ्च यतः—

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ ८ ॥

परं वयं वनचराः, युष्मदीयञ्च जलान्ते गृहं, तत् कथं शक्यते तत्र गन्तुं, तस्मात् तामपि भ्रातृ-पत्नीमत्रानय, येन प्रणम्य तस्या आशीर्वादं गृह्णामि । स आह, मित्र, अस्ति समुद्रान्तरे सुरम्ये पुलिनप्रदेशेऽस्मद्गृहं, तन्मम पृष्ठमारूढः सुखेनाकृत-भयो गच्छ । सोऽपि तच्छ्रुत्वा सानन्दमाह, भद्र, यद्येवं, तर्हि त्वर्यतां, किं विलम्बितेन, एषोऽहं तव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्ठमारूढ़ः। तथानुष्ठितेऽगाधे जलधौ गच्छन्तं मकरमालोक्य भयत्रस्तमना वानरः प्रोवाच, भ्रातः, शनैः शनैर्गम्यतां, जलकल्लोलैः प्लाव्यते मे शरीरम्। तदाकर्ण्य मकरश्चिन्तयामास, असावगाधं जलं प्राप्तो मे वशः सञ्जातः, मत्पृष्ठगतस्तिलमात्रमपि चलितुं न शक्नोति, तस्मात् कथयाम्यस्य निजाभिप्रायं, येनाभीष्टदेवतास्मरणं करोति। आह च, भो मित्र, त्वं वधाय मया समानीतो भार्य्यावाक्येन विश्वास्य, तत् स्मर्य्यतामभीष्टदेवता। सोऽब्रवीत्, भ्रातः, किं मया तस्यास्तवापि चापकृतं यस्मात् भवता मे वधोपायश्चिन्तितः। मकर आह, भो तस्यास्तव हृदयस्यामृतमयफलरसास्वादनमृष्टस्य भक्षणे दोहदः सञ्जातः, तेनैतदनुष्ठितम्। ततः प्रत्युत्पन्नमतिर्वानर आह, भद्र, यद्येवं, तत् किं त्वया न मम तत्रैव व्याहृतं, येन स्वहृदयं जम्बूकोटरे सदैव मया सुगुप्तीकृतं, तत् भ्रातृपत्न्या अर्पयामि। त्वयाहं शून्यहृदयोऽत्र कस्मादानीतः। तदाकर्ण्य मकरः सानन्दमाह, भद्र, यद्येवं, तदर्पय मे स्वहृदयं, येन सा दुष्टपत्नी तद्भक्षयित्वानशनादुत्तिष्ठति। अहं त्वां तमेव जम्बूपादपं प्रापयामि। एवमुक्त्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवर्त्य जम्बूतरुतलं समागमत्। वानरोऽपि जल्पितविविधोपयाचितशतः कथमपि जलधितीरं समासादितवान्। ततश्च दीर्घतरचङ्क्रमणेन तमेव जम्बूपादपमारूढश्चिन्तयामास, अहो मया लब्धास्तावत् प्राणाः। अथवा साध्विदमुच्यते—

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ८ ॥

तन्ममैतदद्य पुनर्जन्मदिनमिव सञ्जातम्। इति चिन्तयानं मकर आह, भो मित्र, अर्पय मे तत् हृदयं, यथा ते भ्रातृपत्नी भक्षयित्वानशनादुत्तिष्ठति। अथ विहस्य निर्भर्त्सयन् वानरस्तमाह, धिग्धिङ्मूर्ख विश्वासघातक, किं कस्यचिद्धृदयद्वयं भवति, तदाशु गम्यतां जम्बूवृक्षस्याधस्तात्, न भूयोऽपि त्वयात्रागन्तव्यम्। तच्छ्रुत्वा मकरः सविलक्षं चिन्तितवान्, अहो मया मूढेन किमस्य स्वचित्ताभिप्रायो निवेदितः। तद्यद्यसौ पुनरपि कथञ्चिद्विश्वासं गच्छति, तद्भूयोऽपि विश्वासयामि। आह च, मित्र, तस्या न किञ्चित् तव हृदयेन प्रयोजनं, मया तव हृदयाभिप्रायपरीक्षणार्थं हास्येनेदमभिहितं, तदागच्छ प्राघुणिकन्यायेनास्मदावासम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वद्भ्रातृपत्नी त्वां प्रत्युत्कण्ठिता तिष्ठति। वानर-श्चाह, भो दुष्ट, गम्यतामधुना, नाहमागमिष्यामि। उक्तञ्च—

बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति।
आख्याहि भद्रे प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम्॥ १०॥

मकर आह, कथमेतत्? सोऽब्रवीत्, कस्मिं-श्चित् कूपे गङ्गदत्तो नाम मण्डूकराजः प्रतिवसति स्म। स कदाचिद्दायादैरुद्वेजितोऽरघट्टघाटिका-मारुह्य कूपात् क्रमेण निष्क्रान्तः। अथ तेन चिन्तितं, कथं तेषां दायादानां मयापकारः कर्त्तव्यः। उक्तञ्च—

आपदि येनापकृतं येन च हसितं दशासु विषमासु।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये॥ ११॥

इत्येवं बहु चिन्तयन् स विले प्रविशन्तं प्रिय-दर्शनाभिधं कृष्णसर्पमपश्यत्। तं दृष्ट्वा भूयो-ऽप्यचिन्तयत्, एनं कृष्णसर्पं तत्र कूपे नीत्वा सकल-दायादानामुच्छेदं करिष्यामि। उक्तञ्च यतः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शत्रुणा योजयेच्छत्रुं बलिना बलवत्तरम् ।
स्वकार्य्याय यतो न स्यात् काचित्पीड़ात्र तत्क्षये ॥१२॥

तथाच—

शत्रुमुन्मूलयेत्प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा ।
व्यथाकरं सुखार्थाय कण्टकेनेव कण्टकम् ॥ १३ ॥

एवं स विभाव्य विलद्वारं गत्वा तमाहूतवान्, एह्येहि प्रियदर्शन एहीति । तच्छ्रुत्वा सर्पश्चिन्तयामास, य एष मामाह्वयति स स्वजातीयो न भवति, तदत्रैव दुर्गे स्थितस्तावद्वेद्मि कोऽयं भविष्यति । उक्तञ्च यतः—

यस्य न ज्ञायते शीलं न कुलं न च संश्रयः ।
न तेन सङ्गतिं कुर्य्यादित्युवाच बृहस्पतिः ॥ १४ ॥

कदाचित् कोऽपि मन्त्रवाद्यौषधचतुरो वा मामाहूय बन्धने क्षिपति, अथवा कश्चित् पुरुषो वैरमाश्रित्य कस्यचिद्विपक्षस्यार्थे मामाह्वयति । आह च, भोः को भवान् । स आह, अहं गङ्गदत्तो नाम मण्डूकाधिपतिस्त्वत्सकाशे मैत्रार्थमभ्यागतः । तच्छ्रुत्वा सर्प आह, भो अश्रद्धेयमेतत् । तृणानां वह्निना सह मैत्रीसङ्गमः क्व । उक्तञ्च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो यस्य जायते वध्यः स स्वप्नेऽपि कथञ्चन ।
न तत्समीपमभ्येति तत्किमेवं प्रजल्पसि ॥ १५ ॥

गङ्गदत्त आह, भो सत्यमेतत् स्वभाववैरी त्वमस्माकं, परं परिभवादहं त्वत्सकाशं प्राप्तः । उक्तञ्च—

सर्व्वनाशे च सञ्जाते प्राणानामपि संशये ।
अपि शत्रुं प्रणम्योच्चै रक्षेत् प्राणान् धनानि च ॥१६॥

सर्प आह, कथय कस्मात्ते परिभवः । स आह दायादेभ्यः । सर्पोऽब्रवीत्, अथ क्व ते आश्रयः । वाप्यां कूपे तड़ागे ह्रदे वा, तत् कथय स्वाश्रयम् । तेनोक्तं, पाषाणचयनिबद्धे कूपे । सर्प आह, अपदा वयं, तन्नास्ति तत्र मे प्रवेशः, प्रविष्टस्य च स्थानं नास्ति यत्र स्थितस्तव दायादान् व्यापादयामि, तद्गम्यताम् । उक्तञ्च—

यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितञ्च परिणामे यत् तदाद्यं भूतिमिच्छता ॥ १७ ॥

गङ्गदत्त आह, भो समागच्छ त्वम्, अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि । तथा तस्य मध्ये जलोपान्ते रम्यतरं कोटरमस्ति, तत्र स्थितस्त्वं लीलया तान् दायादान् साधयिष्यसि । तच्छ्रुत्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्पोऽप्यचिन्तयत्, अहं तावत् परिणतवयाः कदाचित् कथञ्चिन्मूषकमेकं प्राप्नोमि न वा, तत् सुखावहो जीवनोपायोऽयमनेन कुलाङ्गारेण मे दर्शितः। तद्गत्वा तान् मण्डूकान् भक्षयामीति। अथवा साध्विदमुच्यते—

यो हि प्राणपरिक्षीणः सहायपरिवर्ज्जितः।
स हि सर्व्वसुखोपायां वृत्तिमाचरयेद्बुधः॥ १८॥

एवं विचिन्त्य तमाह, भो गङ्गदत्त, यद्येवं, तदग्रे भव, येन तत्र गच्छावः। गङ्गदत्त आह, भो प्रियदर्शन, अहं त्वां सुखोपायेन तत्र नेष्यामि स्थानञ्च दर्शयिष्यामि। परं त्वया मत्परिजनो रक्षणीयः। केवलं यानहं तव दर्शयिष्यामि त एव भक्षणीया इति। सर्प आह, भद्र, साम्प्रतं त्वं मे मित्रं जातं, तन्न भेतव्यं, त्वद्वचनेन भक्षणीयास्ते दायादाः। एवमुक्त्वा विलान्निष्क्रम्य तमालिङ्ग्य च तेनैव सह प्रस्थितः। अथ कूपान्तमासाद्यारघट्टघटिकामार्गेण सर्पस्तेनात्मना स्वालयं नीतः। ततश्च गङ्गदत्तेन कृष्णसर्पं कोटरे स्थित्वा दर्शितास्ते दायादाः। ते च तेन सर्व्वे शनैः शनैर्भक्षिताः। अथ मण्डूकाभावे सर्पेणाभिहितं, भद्र, निःशेषितास्ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिपवः, तत् प्रयच्छ मेऽन्यत् किञ्चिद्भोजनं, यतोऽहं त्वयात्रानीतः। गङ्गदत्त आह, कृतं त्वया मित्रकृत्यं, तत्साम्प्रतमनेनैव घाटिकायन्त्रमार्गेण गम्यतामिति। सर्प आह, भो गङ्गदत्त, न सम्यगभिहितं भवता, कथमहं तत्र गच्छामि, मदीयं बिलदुर्गम् अन्येन रुद्धं भविष्यति, तस्मादत्र स्थितस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ, नो चेत् सर्व्वानपि भक्षयिष्यामीति। तच्छ्रुत्वा गङ्गदत्तः व्याकुलितमना व्यचिन्तयत्, अहो किमेतन्मया कृतमेनं समानीय, तद्यदि निषेधयिष्यामि, तत् सर्व्वानपि भक्षयिष्यति। अथवा युक्तमुच्यते—

योऽमित्रं कुरुते मित्रं वीर्य्याभ्यधिकमात्मनः।
स करोति न सन्देहः स्वयं हि विषभक्षणम् ॥१९॥

तत् प्रयच्छाम्यस्यैकैकं दिनं प्रति सुहृदमपि।
उक्तञ्च—

सर्व्वस्वहरणे युक्तं शत्रुं बुद्धियुता नराः।
तोषयन्त्यल्पदानेन बाड़वं सागरो यथा ॥ २० ॥

तथाच—

न स्वल्पस्य कृते भूरि नाशयेन्मतिमान् नरः।
एतदेव हि पाण्डित्यं यत् स्वल्पाद्भूरिरक्षणम् ॥२१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं निश्चित्य तमेकैकं मण्डूकं नित्यमेवादिशति । सोऽपि तं भक्षयित्वान्यानपि तस्य परोक्षे भक्षयति । अथान्यदिने तेनापरान् मण्डूकान् भक्षयित्वा गङ्गदत्तसुतो यमुनादत्तो नाम मण्डूको भक्षितः। तं भक्षितं मत्वा गङ्गदत्तः तारस्वरेण धिक् धिक् प्रलापपरः कथञ्चिदपि न क्रन्दनाद्विरराम । ततः स्वपत्न्याभिहितः—

किं क्रन्दसि दुराक्रन्द ! स्वपक्षक्षयकारक ! ।
स्वपक्षस्य क्षये जाते को नस्त्राता भविष्यति ॥ २२ ॥

तदद्यापि विचिन्त्यतामात्मनो निष्क्रमणम् अस्य वधोपायो वा । अथ गच्छता कालेन सकलमपि कवलितं मण्डूककुलं, केवलमेको गङ्गदत्तस्तिष्ठति । ततश्च प्रियदर्शनेन भणितं, भद्र गङ्गदत्त, बुभुक्षितोऽहं, निःशेषिताः सर्व्वे मण्डूकाः, भवांस्तिष्ठति, तद्दीयतां मे किञ्चिद्भोजनं,यतोऽहं त्वयात्रानीतः । स आह, भो मित्र, न त्वयात्र विषये मयि विद्यमाने कापि चिन्ता कार्य्या, तद्यदि मां प्रेषयिष्यसि ततोऽन्यकूपस्थानपि मण्डूकान् विश्वास्यात्रानयामि। स आह, मम तावत् त्वमभक्ष्यो भ्रातृस्थाने, तद्यद्येवं करोषि तत् साम्प्रतं पितृस्थाने भवसि। तदेवं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियतामिति । सोऽपि तदाकर्ण्यारघट्टघाटिकामाश्रित्य विविधदेवतोपकल्पितपूजोपयाचितोऽस्मात् कूपाद्विनिष्क्रान्तः । प्रियदर्शनोऽपि तदागमनकाङ्क्षया तत्रस्थः प्रतीक्षमाणस्तिष्ठति । अथ चिरादपि अनागते गङ्गदत्ते प्रियदर्शनोऽन्यकोटरवासिनीं गोधामुवाच, भद्रे, क्रियतां मे स्तोकं साहाय्यम् । यतश्चिरपरिचितस्ते गङ्गदत्तः, तद्गत्वा तत्सकाशं कुत्रचिज्जलाशयेऽन्विष्य मम सन्देशं कथय, यदागम्यतां द्रुततरमेकाकिनापि भवता यद्यन्ये मण्डूका नागच्छन्ति । नाहं त्वया विनात्र वस्तुं शक्नोमि, तथाहं यदि त्वां प्रति विरुद्धमाचरामि, तन्मदीयं जन्मसुकृतं तवेति । गोधापि तद्वचनाद्द्रुततरं गङ्गदत्तमन्विष्याह, भद्र गङ्गदत्त, स तव सुहृत् प्रियदर्शनस्तव मार्गं समीक्षमाणस्तिष्ठति, तच्छीघ्रमागम्यताम् । अपरञ्च, तेन तव विरूपकरणार्थे जन्मसुकृतमन्तरे धृतं, तन्निःशङ्केन मनसा समागम्यतामिति । तदाकर्ण्य गङ्गदत्तः प्राह—

बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आख्याहि भद्रे ! प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम् ॥ २२ ॥

इत्येवमुक्त्वा स तां विसर्ज्जयामास। तद्भो दुष्ट जलचर, अहमपि गङ्गदत्त इव त्वद्गृहे न कथञ्चिदप्यायास्यामि। तच्छ्रुत्वा मकर आह, भो मित्र, नैतद्युज्यते ते कर्त्तुं, सर्व्वथैव मे कृतघ्नतादोषमपनय मद्गृहागमनेन, अन्यथा तवोपरि प्रायोपवेशनं करिष्यामि। वानर आह, मूढ़, किमहं लम्बकर्णो मूर्खो दृष्टापायोऽपि स्वयमेव तत्रैव गत्वात्मानं व्यापादयामि। यतः—

आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमम्।
अकर्णहृदयो मूर्खो यो गत्वा पुनरागतः॥ २३ ॥

मकर आह, भद्र, स को लम्बकर्णः, कथं दृष्टापायोऽपि मृतः, तन्मे निवेद्यताम्। वानर आह, कस्मिंश्चिद्वनोद्देशे करालकेशरो नाम सिंहः प्रतिवसति स्म। तस्य च धूसरको नाम शृगालः सदैवानुयायी परिचारकोऽस्ति। अथ कदाचित् तस्य सिंहस्य हस्तिना सह युध्यमानस्य शरीरे गुरुतराः प्रहाराः सञ्जाताः, यैः पदमेकमपि चलितुं न शक्नोति। तस्याचलनाच्च धूसरकः क्षुत्क्षामकण्ठो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दौर्बल्यं गतः अन्यस्मिन्नहनि सिंहमवोचत्। स्वामिन्, बुभुक्षया पीड़ितोऽहं पदात् पदमपि चलितुं न शक्नोमि, तत् कथं ते शुश्रूषां करोमि। सिंह आह, भो गच्छान्वेषय किञ्चित् सत्त्वं, येनेमामवस्थां गतोऽपि व्यापादयामि। तदाकर्ण्य शृगालोऽन्वेषणं कुर्व्वन् कञ्चित् समीपवर्त्तिनं ग्राममासादितवान्। तत्र च लम्बकर्णो नाम गर्द्दभस्तड़ागोपान्ते प्रविरल-दूर्व्वाङ्कुरान् कृच्छ्रादास्वादयन् दृष्टः। ततश्च समीप-वर्त्तिना भूत्वा तेनाभिहितः। माम, नमस्कारोऽयं मदीयः सम्भाव्यतां, चिराद्दृष्टोऽसि, तत् कथय किमेवं दुर्बलतां गतः। लम्बकर्ण आह, भो भगिनीसुत, किं कथयामि, रजकोऽतिनिर्द्दयोऽतिभारेण मां पीड़यति, घासमुष्टिमपि न प्रयच्छति, केवलमत्र दूर्व्वाङ्कुरान् धूलिमिश्रितान् भक्षयामि, तत् कुतो मे शरीरपुष्टिरिति। शृगाल आह, माम, यद्येवं, तदस्ति मरकतसदृशशस्यप्रायो नदीसनाथो रमणीय-तरः प्रदेशः, तत्रागत्य मया सह सुभाषितगोष्ठीसुख-मनुभवन् तिष्ठ। लम्बकर्ण आह, भो भगिनीसुत, युक्तमुक्तं भवता, परं वयं ग्राम्याः पशवोऽरण्य-चराणां वध्याः, तत् किं तेन भव्यप्रदेशेन। शृगाल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आह, माम मेवं वद, मङ्गजपञ्जरपरिरक्षितः प्रदेशो-ऽसौ, तन्नास्ति कस्यचिदपरस्य तत्र प्रवेशः। अथ शृगालवचनानि श्रुत्वा लम्बकर्णस्तमुवाच, भद्र, यद्येवं, तदग्रे भव, त्वरितं तत्र गच्छावः। तथा-नुष्ठिते शृगालेन सह सिंहान्तिकमागतः। सिंहोऽपि व्यथाकुलस्तं गर्द्दभं दृष्ट्वा यावत् समुत्तिष्ठति, ताव-द्रासभः पलायितुमारब्धवान्। अथ तस्य पलाय-मानस्य सिंहेन तलप्रहारो दत्तः, स च मन्दभाग्यस्य व्यवसाय इव व्यर्थतां गतः। अत्रान्तरे शृगालः कोपाविष्टस्तमुवाच, भोः किमेवंविधः प्रहारस्ते, यदि गर्द्दभोऽपि तव पुरो बलाद्गच्छति, तत् कथं गजेन सह युद्धं करिष्यसि, तद्दृष्टं ते बलम्। अथ विलक्षस्मितं सिंह आह, भोः किमहं करोमि, मया न क्रमः सज्जीकृत आसीत्, अन्यथा गजोऽपि मत्-क्रमाक्रान्तो न गच्छति। शृगाल आह, अद्याप्येक-वारं तवान्तिके तमानयिष्यामि, परं त्वया सज्जीकृत-क्रमेण स्थातव्यम्। सिंह आह, भद्र, यो मां प्रत्यक्षं दृष्ट्वा गतः, स पुनः कथमत्रैवागमिष्यति, तदन्यं किमपि सत्त्वमन्विष्यताम्। शृगाल आह, किं तवानेन व्यापारेण, त्वं केवलं सज्जितक्रमस्तिष्ठ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथानुष्ठिते शृगालोऽपि यावद्रासभमार्गेण गच्छति, तावत् तत्रैव स्थाने चरन् दृष्टः । अत्रान्तरे धूर्त्तजन-वचनशतप्रतारितः पुनरपि सिंहस्यान्तिकमागतः । अथवा साध्विदमुच्यते—

जानन्नपि नरो दैवात् प्रकरोति विगर्हितम् ।
कर्म किं कस्यचिल्लोके गर्हितं रोचते कथम् ॥ २४ ॥

ततः प्राक्सज्जितक्रमेण सिंहेन लम्बकर्णो व्यापादितः । ततश्च तं हत्वा शृगालं रक्षापालं निरूप्य स्वयं स्नानार्थं नद्यां गतः । अथ शृगाले-नातिलौल्यौत्सुक्यात् खरस्य कर्णसहितं हृदयं भक्षितम् । अत्रान्तरे यावत् सिंहः स्नात्वा कृत-देवार्चनः प्रतर्पितपितृगणः, तावत् कर्णहृदयरहितो रासभस्तिष्ठति । तं दृष्ट्वा कोपपरीतात्मा सिंहः शृगालमाह, पाप, किमिदमनुचितं कर्म समा-चरितं, यत् कर्णहृदयभक्षणेनायमुच्छिष्टतां नीतः । शृगालः सविनयमाह, स्वामिन्, मा मैवं वद, यत् कर्णहृदयरहितोऽयं रासभ आसीत्, तेनेहागत्य त्वामवलोक्य भयाद्गत्वा भूयोऽप्यागतः । अथ तद्वचनं श्रद्धेयं मत्वा सिंहस्तेन सह संविभज्य निःशङ्कित-मनास्तं भक्षितवान् । अतोऽहं ब्रवीमि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमम्।
अकर्णहृदयो मूर्खो यो गत्वा पुनरागतः॥ २५॥

तन्मूर्ख कपटं कृतम्। अपरं त्वया युधिष्ठिरेणेव सत्यवचनेन विनाशितम्। अथवा साध्विदमुच्यते—

स्वार्थमुत्सृज्य यो दम्भी सत्यं ब्रूते सुमन्दधीः।
स स्वार्थाद्भ्रश्यते नूनं युधिष्ठिर इवापरः॥ २६॥

मकर आह, कथमेतत्? वानरः कथयति। कस्मिंश्चिदधिष्ठाने युधिष्ठिरनामा कुम्भकारः प्रतिवसति स्म। स कदाचित् प्रमादादर्द्धभग्नघटकर्परतीक्ष्णाग्रस्योपरि महता वेगेन धावन् पतितः। ततः कर्परकोट्या पाटितललाटो रुधिरप्लावित-तनुः कृच्छ्रादुत्थाय स्वाश्रयमाजगाम। ततश्चापथ्य-सेवनात् प्रहारस्तस्य करालतां गतः, कृच्छ्रेण नीरोगतां नीतः। अथ कदाचिद्दुर्भिक्षपीड़िते देशे स कुम्भकारः क्षुत्क्षामकण्ठः कैश्चिद्राजसेवकैः सह देशान्तरं गत्वा कस्यापि राज्ञः सेवको बभूव। सोऽपि राजा तस्य ललाटे विकरालं प्रहारक्षतं दृष्ट्वा चिन्तयामास, यत् वीरपुरुषः कश्चिदयं नूनं, तेन ललाटपट्टेऽस्य सम्मुखः प्रहारः। अतस्तं सम्मान-दानादिभिः सर्व्वेषां राजपुत्राणां सकाशाद्विशेष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसादेन राजा पश्यति। तेऽपि राजपुत्रास्तस्य तं प्रसादमतिरेकं दृष्ट्वा परमेर्ष्याधर्म्मं वहन्तोऽपि राजभयान्न किञ्चिदूचुः। अथान्यस्मिन्नहनि तस्य भूपतेर्वीरसम्भावनायां क्रियमाणायां विग्रहे समुपस्थिते प्रकल्प्यमानेषु गजेषु सन्नह्यमानेषु वाजिषु योद्धृषु प्रगुणीक्रियमाणेषु तेन भूभुजा स कुम्भकारः प्रस्तावानुगतं पृष्टो निर्व्यञ्जने, भो राजपुत्र, किं ते नाम, का च जातिः, कस्मिन् संग्रामे प्रहारोऽयं ते ललाटे लग्नः। स आह, देव, नायं शस्त्रप्रहारः, युधिष्ठिराभिधः कुलालोऽहं प्रकृत्या, मद्गृहेऽनेककर्पराण्यासन्। अथाहं कदाचिन्मद्यपानं कृत्वा निर्गतः प्रधावन् कर्परोपरि पतितः, ततः प्रहारविकारोऽयं मे ललाटे एवं विकरालतां गतः। तदाकर्ण्य राजा सव्रीडमुवाच, अहो वञ्चितोऽहं राजपुत्रानुकारिणानेन कुलालेन, तद्दीयतां द्रागेतस्यार्द्धचन्द्रः। तथानुष्ठिते कुम्भकारः प्राह, देव, मा मैवं कुरु, पश्य मे रणे हस्तलाघवम्। राजाह, भोः सर्व्वगुणसम्पन्नो भवान्, तथापि गम्यताम्। उक्तञ्च—

शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक।
यस्मिन् कुले समुत्पन्नो गजस्तत्र न हन्यते॥ २७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ कुलालः पृच्छति, कथमेतत्। राजा कथयति। कस्मिंश्चिद्वनोद्देशे सिंहदम्पती प्रतिवसतः स्म। अथ कदाचित् सिंही प्रसूता पुत्त्रद्वयमजीजनत्। सिंहोऽपि नित्यमेव मृगान् व्यापाद्य सिंह्यै ददाति। अथान्यस्मिन्नहनि तेन किमपि नासादितं, वने भ्रमतोऽपि तस्य रविरस्तं गतः। अथ तेन स्वगृहमागच्छता शृगालशिशुः प्राप्तः। स च बालकोऽयमिति अवधार्य्य यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्या जीवन्तमेव समर्पितवान्। ततः सिंह्याभिहितं, भोः कान्त, त्वयानीतं किञ्चिदस्माकं भोजनम्। सिंह आह, प्रिये, मयाद्यैनं शृगालशिशुं परित्यज्य न किञ्चित् सत्त्वमासादितम्। स च बालोऽयमिति मत्वा न व्यापादितो विशेषात् स्वजातीयश्च, इदानीं त्वमेनं भक्षयित्वा पथ्यं कुरु। प्रभातेऽन्यत् किञ्चिदुपार्ज्जयिष्यामि। सा प्राह, भोः कान्त, त्वया बालकोऽयं विचिन्त्य न हतः, तत् कथमेनमहं स्वोदरस्यार्थे विनाशयामि। उक्तञ्च—

अकृत्यं नैव कर्त्तव्यं प्राणत्यागेऽपि संस्थिते।
न च कृत्यं परित्याज्यं धर्म्म एष सनातनः॥ २८॥

तस्मान्ममायं तृतीयः पुत्त्रो भविष्यति। इत्येव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी पुस्तकालय

भुक्त्वा तमपि स्वस्तनक्षीरेण परां पुष्टिमनयत्। एवं ते त्रयोऽपि शिशवः परस्परमज्ञातजातिविशेषा एकाचारविहारा बाल्यसमयं निर्व्वाहयन्ति। अथ कदाचित् तत्र वने भ्रमन्नरण्यगजः समायातः। तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत् तेन शृगालसुतेनाभिहितं, अहो गजोऽयं युष्मत्कुलशत्रुः, तन्न गन्तव्यमेतस्याभिमुखम्। एवमुक्त्वा गृहं प्रधावितः। तावपि ज्येष्ठबान्धवभङ्गान्निरुत्साहतां गतौ। अथवा साध्विदमुच्यते—

एकेनापि सुधीरेण सोत्साहेन रणं प्रति।
सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात्॥ २८॥

अथ तौ द्वावपि गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुः, यथा गजं दृष्ट्वा दूरतोऽपि नष्टः। सोऽपि तदाकर्ण्य कोपाविष्टमनाः प्रस्फुरिताधरपल्लवस्ताम्रलोचनो भ्रुकुटिं कृत्वा तौ निर्भर्त्सयन् परुषतरवचनान्युवाच। ततः सिंह्यैकान्ते नीत्वा प्रबोधितोऽसौ, वत्स मैवं कदाचिज्जल्प, भवदीयलघुभ्रातरावेतौ। अथासौ प्रभूतकोपाविष्टस्तामुवाच, किमहमेताभ्यां शौर्य्येण रूपेण विद्याभ्यासेन कौशलेन वा हीनः येन मामुपहसतः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्मयाऽवश्यमेतौ व्यापादनीयौ । तदाकर्ण्य सिंही तस्य जीवितमिच्छन्त्यन्तर्विहस्य प्राह—

शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक ।
यस्मिन् कुले समुत्पन्नो गजस्तत्र न हन्यते ॥ ३० ॥

तत् सम्यक् शृणु वत्स, त्वं शृगालीसुतः, कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः । तद्यावदेतौ मत्पुत्रौ शिशुत्वात् त्वां शृगालं न जानीतः, तावद्द्रुततरं गत्वा स्वजातीयानां मध्ये भव, नो चेदाभ्यां हतो मृत्युपथं समेष्यसि । सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपसृत्य स्वजात्या मिलितः । तस्मात् त्वमपि यावदेते राजपुत्रास्त्वां कुलालं न जानन्ति तावद्द्रुततरमपसर, नो चेदेतेषां सकाशाद्विडम्बनां प्राप्य मरिष्यसि । कुलालोऽपि तदाकर्ण्य सत्वरं प्रनष्टः । अतोऽहं ब्रवीमि—

स्वार्थमुत्सृज्य यो दम्भी सत्यं ब्रूते सुमन्दधीः ।
स स्वार्थाद्भ्रश्यते नूनं युधिष्ठिर इवापरः ॥ ३१ ॥

धिङ्मूर्ख, यत् त्वया स्त्रियोऽर्थे एतत् कार्यमनुष्ठातुमारब्धम् । ततस्तद्भद्रानीतेन त्वया मां प्रति वधोपायप्रयासः प्रारब्धः, परं स्ववाग्दोषेणैव प्रकटीभूतः । अथवा साध्विदमुच्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः।
बकास्तत्र न बध्यन्ते मौनं सर्व्वार्थसाधनम्॥ ३२॥

अथैवं तेन सह वदतो मकरस्य जलचरेणैकेनागत्याभिहितं, भो मकर, त्वदीया भार्य्यानशनोपविष्टा त्वयि चिरयति प्रणयाभिभवाद्विपन्ना। एवं तद्वज्रपातसदृशवचनमाकर्ण्यातीव व्याकुलितहृदयः प्रलपितमेवं चकार, अहो किमिदं सञ्जातं मे मन्दभाग्यस्य। उक्तञ्च—

माता यस्य गृहे नास्ति भार्य्या च प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥ ३३॥

तन्मित्र क्षम्यतां, मया तेऽपराधः कृतः। सम्प्रति अहं तु स्त्रीवियोगाद्वैश्वानरप्रवेशं करिष्यामि। तच्छ्रुत्वा वानरः प्रहसन् प्रोवाच, भो ज्ञातस्त्वं मया प्रथममेव यत् त्वं स्त्रीवश्यः स्त्रीजितश्च, साम्प्रतञ्च प्रत्ययः सञ्जातः। तन्मूढ़ आनन्देऽपि त्वं विषादं गतः। तादृग्भार्य्यायां मृतायामुत्सवः कर्त्तुं प्रयुज्यते। उक्तञ्च यतः—

या भार्य्या दुष्टचारित्रा सततं कलहप्रिया।
भार्य्यारूपेण सा ज्ञेया विदग्धैर्दारुणा जरा॥ ३४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मकर आह, भो मित्र, अस्त्येतत्, परं किं करोमि, ममानर्थद्वयमेतत् सञ्जातं, एकस्तावद्गृहभङ्गः, अपरस्त्वद्विधेन मित्रेण सह चित्तविश्लेषः। अथवा भवत्येवं दैवयोगात्। एवं तस्य कथयतः पुनरन्येन जलचरेणागत्य निवेदितं, यदहो त्वदीयं गृहमप्यपरेण महामकरेण गृहीतम्। तच्छ्रुत्वासावतिदुःखितमनास्तं गृहान्निःसारयितुमुपायं चिन्तयन्नुवाच, अहो पश्य मे दैवोपहतत्वं—

मित्रं ह्यमित्रतां यातम् अपरं मे प्रिया मृता।
गृहमन्येन च व्याप्तं किमद्यापि भविष्यति॥ २५॥

अथवा साध्विदमुच्यते—

क्षते प्रहारा निपतन्त्यभीक्ष्ण-
मन्नक्षये वर्द्धति जाठराग्निः।
आपत्सु वैराणि समुद्भवन्ति
वामे विधौ सर्व्वमिदं नराणाम्॥ २६॥

तत् किं करोमि, किमनेन सह युद्धं करोमि, किं वा साम्नैव सम्बोध्य गृहान्निःसारयामि, किं वा भेदं दानं वा करोमि, अथवामुमेव वानरमित्रं पृच्छामि। उक्तञ्च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यः पृष्ट्वा कुरुते कार्य्यं प्रष्टव्यान् सहितान् गुरून् ।
न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्म्मणि ॥ २७ ॥

एवं सम्प्रधार्य्य भूयोऽपि तमेव जम्बूवृक्षमारूढं कपिमपृच्छत्, भो मित्र, पश्य मे मन्दभाग्यतां, यत् सम्प्रति गृहमपि मे बलवत्तरेण मकरेण रुद्धं, तदहं त्वां प्रष्टुमभ्यागतः, कथय किं करोमि, सामादीनामुपायानां मध्ये कस्यात्र विषयः । स आह, भो कृतघ्न पापचारिन्, मया निषिद्धोऽपि किं भूयो मामनुसरसि, नाहं तव मूर्खस्योपदेशमपि दास्यामि । तच्छ्रुत्वा मकरः प्राह, भो मित्र, सापराधस्य मे पूर्व्वस्नेहमनुस्मृत्य हितोपदेशं देहि । वानर आह, नाहं ते कथयिष्यामि, यद्भार्य्यावाक्येन भवताहं समुद्रे प्रक्षेप्तुं नीतः, तदेव न युक्तम् । यद्यपि भार्य्या सर्व्वलोकादपि वल्लभा भवति, तथापि न मित्राणि बान्धवाश्च भार्य्यावाक्येन समुद्रे प्रक्षिप्यन्ते । तन्मूर्ख, मूढ़त्वेन नाशस्तव मया प्रागेव निवेदित आसीत् । अथ तच्छ्रुत्वा मकरः प्राह, भद्र !

प्राहुः साप्तपदं मैत्रं जनाः शास्त्रविचक्षणाः ।
मित्रताञ्च पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु ॥ २८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपदेशप्रदातॄणां नराणां हितमिच्छताम् ।
परस्मिन्निह लोके च व्यसनं नोपपद्यते ॥ ३९ ॥

तत् सर्व्वथा कृतघ्नस्यापि मे कुरु प्रसादमुपदेश-प्रदानेन । उक्तञ्च—

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ ४० ॥

तदाकर्ण्य वानर आह, भद्र, यद्येवं, तर्हि तत्र गत्वा तेन सह युद्धं कुरु । उक्तञ्च—

हतस्त्वं प्राप्स्यसि स्वर्गं जीवन् गृहमथो यशः ।
युध्यमानस्य ते भावि गुणद्वयमनुत्तमम् ॥ ४१ ॥
उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन समशक्तिं पराक्रमैः ॥ ४२ ॥

मकर आह, कथमेतत् ? सोऽब्रवीत्, अस्ति कस्मिंश्चिद्वनोद्देशे महाचतुरको नाम शृगालः । तेन कदाचिदरण्ये स्वयं मृतो गजः समासादितः । तस्य समन्तात् परिभ्रमति, परं कठिनां त्वचं भेत्तुं न शक्नोति । अथात्रावसर इतश्चेतश्च विचरन् कश्चित् सिंहस्तत्रैव प्रदेशे समाययौ । अथ तं समागतं दृष्ट्वा स क्षितितलविन्यस्तमौलिमण्डलः संयोजित-करयुगलः सविनयमुवाच, स्वामिन्, त्वदीयोऽहं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लागुड़िकः स्थितस्त्वदर्थे गजमिमं रक्षामि, तदेनं भक्षयतु स्वामी। तं प्रणतं दृष्ट्वा सिंहः प्राह, भो-नाहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि, तत् तवैव गजोऽयं मया प्रसादीकृतः। तच्छ्रुत्वा शृगालः सानन्दमाह, युक्तमिदं स्वामिनो निज-भृत्येषु। अथ सिंहे गते कश्चिद्व्याघ्रः समाययौ, तमपि दृष्ट्वासौ व्यचिन्तयत्, अहो एकस्तावत् दुरात्मा प्रणिपातेनापवाहितः, तत् कथमिदानी-मेनमपवाहयिष्यामि, नूनं शूरोऽयं न खलु भेदं विना साध्यो भविष्यति। उक्तञ्च यतः—

न यत्र शक्यते कर्त्तुं साम दानमथापि वा।
भेदस्तत्र प्रयोक्तव्यो यतः स वशकारकः॥ ४३॥

एवं सम्प्रधार्य्य तस्याभिमुखो भूत्वा गर्व्वादुन्नत-कन्धरः ससम्भ्रममुवाच, माम, कथमत्र भवान् मृत्युमुखे प्रविष्टः, येनैष गजः सिंहेन व्यापादितः, स च मामेतद्रक्षणे नियुज्य नद्यां स्नानार्थं गतः, तेन च गच्छता मम समादिष्टं, यदि कश्चिदिह व्याघ्रः समायाति, तत् त्वया सुगुप्तं ममावेदनीयं, येन वनमिदं मया निर्व्याघ्रं कर्त्तव्यम्। यतः पूर्व्वं व्याघ्रेणैकेन मया व्यापादितो गजः शून्ये भक्ष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यित्वा उच्छिष्टतां नीतः, तद्दिनादारभ्य व्याघ्रान् प्रति प्रकुपितोऽस्मि। तच्छ्रुत्वा व्याघ्रः सन्त्रस्तमाह, भो भागिनेय, देहि मे प्राणदक्षिणां, ततस्त्वया तस्यात्र चिरायातस्यापि मदीया कापि वार्त्ता नाख्येया। एवमभिधाय सत्वरं पलायाञ्चक्रे। अथ गते व्याघ्रे तत्र कश्चिद्द्वीपी समायातः। तमपि दृष्ट्वासौ व्यचिन्तयत्, दृढ़दंष्ट्रोऽयं चित्रकः, तदस्य पार्श्वादस्य गजस्य यथा चर्म्मच्छेदो भवति तथा करोमि। एवं निश्चित्य तमपि उवाच, भो भगिनीसुत, किमतिचिराद्दृष्टोऽसि, कथं च बुभुक्षित इव लक्ष्यसे, तदतिथिरसि मे। एष गजः सिंहेन हतस्तिष्ठति, अहञ्चास्य तदादिष्टो रक्षापालः, परं तथापि यावत् सिंहो न समायाति, तावदस्य गजस्य मांसं भक्षयित्वा तृप्तिं कृत्वा द्रुततरं व्रज। स आह, माम, यद्येवं, तन्न कार्य्यं मे मांसाशनेन, यतो जीवन्नरो भद्रशतानि पश्यति। उक्तञ्च—

यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत्।
हितञ्च परिणामे यत् तदाद्यं भूतिमिच्छता॥ ४४॥

तत् सर्व्वथा तदेव भुज्यते यदेव परिणमति, तदहमितोऽपयास्यामि। शृगाल आह, भोऽधीर,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्रब्धो भूत्वा भक्षय त्वं, तस्यागमनं दूरतोऽपि तवाहं निवेदयिष्यामि। तथानुष्ठिते द्वीपिना भिन्नां त्वचं विज्ञाय जम्बूकेनाभिहितं, भो भगिनीसुत, गम्यतां गम्यताम्, एष सिंहः समायाति। तच्छ्रुत्वा चित्रको दूरं प्रनष्टः। अथ यावदसौ तद्भेदकृतद्वारेण किञ्चिन्मांसं भक्षयति, तावदतिसंक्रुद्धोऽपरः शृगालः समाययौ। अथ तमात्मतुल्यपराक्रमं दृष्ट्वैनं श्लोकमपठत्—

उत्तमं प्रणिपातेन शूरं भेदेन योजयेत्।
नीचमल्पप्रदानेन समशक्तिं पराक्रमैः॥ ४५॥

ततस्तदभिमुखकृतप्रयाणः स्वदंष्ट्राभिस्तं विदार्य्य दिशो भागं कृत्वा स्वयं सुखेन चिरकालं हस्तिमांसं बुभुजे। एवं त्वमपि तं रिपुं सजातीयं युद्धेन परिभूय दिशो भागं कुरु, नो चेत् पश्चाद्बद्धमूलादस्मात् त्वमपि विनाशमवाप्स्यसि। सोऽपि मकरस्तदुपदेशं श्रुत्वा कृतमरणनिश्चयो वानरमनुज्ञाप्य स्वाश्रयं गतः। तत्र च तेन स्वगृहप्रविष्टेनाततायिना सह विग्रहं कृत्वा दृढसत्त्वावष्टम्भनाच्च तं व्यापाद्य स्वाश्रयञ्च लब्ध्वा सुखेन चिरकालमतिष्ठत्।

—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हितोपदेशः ।

वीरवरोपाख्यानम् ।

अथैकदा वीरवरो नाम राजपुत्रः कुतश्चिद्देशादागत्य शूद्रकस्य राज्ञः द्वारदेशमुपगम्य प्रतीहारमुवाच, अहं वर्त्तनार्थी राजपुत्रो, राजदर्शनं कारय। ततस्तेनासौ राजदर्शनं कारितो ब्रूते, देव, यदि मया सेवकेन प्रयोजनमस्ति, तदास्मद्वर्त्तनं क्रियताम्। शूद्रक उवाच, किन्ते वर्त्तनम्। वीरवरो ब्रूते, प्रत्यहं सुवर्णपञ्चशतानि देहि। राजाह, का ते सामग्री। वीरवरो ब्रूते, द्वौ बाहू, तृतीयश्च खड्गः। राजाह, नैतच्छक्यम्। तच्छ्रुत्वा वीरवरश्चलितः। अथ मन्त्रिभिरुक्तं, देव, दिनचतुष्टयस्य वर्त्तनं दत्त्वा ज्ञायतामस्य स्वरूपं किमुपयुक्तोऽयमेतावद्वर्त्तनं गृह्णात्यनुपयुक्तो वेति। ततो मन्त्रिवचनादाहूय वीरवराय ताम्बूलं दत्त्वा पञ्चशतानि सुवर्णानि दत्तानि। वर्त्तनविनियोगश्च राज्ञा सुनिभृतं निरूपितः। तदर्द्धं वीरवरेण देवेभ्यो ब्राह्मणेभ्यो दत्तं, स्थितस्यार्द्धं दुःखितेभ्यः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदवशिष्टं भोज्यव्ययविलासव्ययेन। एतत् सर्व्वं नित्यकृत्यं कृत्वा राजद्वारमहर्निशं खड्गपाणिः शेते। यदा च राजा स्वयं समादिशति, तदा स्वगृहमपि याति। अथैकदा कृष्णचतुर्द्दश्यां रात्रौ राजा करुणं क्रन्दनध्वनिं शुश्राव। शूद्रक उवाच, कः कोऽत्र द्वारि। तेनोक्तं, देवाहं वीरवरः। राजोवाच, क्रन्दनानुसरणं क्रियताम्। वीरवरो यथाज्ञापयति देव इत्युक्त्वा चलितः। राज्ञा च चिन्तितं, न तदुचितम्, अयमेकाकी राजपुत्त्रो मया सूचीभेद्ये तमसि प्रेरितः, तदनुगम्य किमेतदिति निरूपयामि। ततो राजापि खड्गमादाय तदनुसरणक्रमेण नगराद्बहिर्निर्जगाम। गत्वा च वीरवरेण रुदती रूपयौवनसम्पन्ना सर्व्वालङ्कारभूषिता काचित् स्त्री दृष्टा, पृष्टा च, का त्वं, किमर्थं रोदिषि। स्त्रियोक्तम्, अहमेतस्य शूद्रकस्य राजलक्ष्मीश्चिरादेतस्य भुजच्छायायां महता सुखेन विश्रान्ता, इदानीमन्यत्र गमिष्यामि। वीरवरो ब्रूते, यत्रापायः सम्भवति, तत्रोपायोऽप्यस्ति। तत् कथं स्यात् पुनरिहावलम्बनं भवत्याः। लक्ष्मीरुवाच, यदि त्वमात्मनः पुत्त्रं शक्तिधरं द्वात्रिंश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्षणोपेतं भगवत्याः सर्व्वमङ्गलाया उपहारीकरोषि, तदाहं पुनरत्र सुचिरं निवसामीत्युक्ता अदृश्याऽभवत्। ततो वीरवरेण स्वगृहं गत्वा निद्रायमाणा स्ववधूः प्रबोधिता, पुत्रश्च। तौ निद्रां परित्यज्य उत्थाय उपविष्टौ। वीरवरस्तत् सर्व्वं लक्ष्मीवचनमुक्तवान्। तच्छ्रुत्वा सानन्दः शक्तिधरो ब्रूते, धन्योऽहमेवम्भूतः स्वामिराज्यरक्षार्थं यन्ममोपयोगः श्लाघ्यस्तत् कोऽधुना विलम्बस्य हेतुः। एवंविधे कर्म्मणि देहस्य विनियोगः श्लाघ्यः। यतः—

धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ १ ॥

शक्तिधरमातोवाच, यद्येतन्न कर्त्तव्यं तत् केनाप्यन्येन कर्म्मणा मुख्यस्य महावर्त्तनस्य निष्क्रयो भविष्यति। इत्यालोच्य सर्व्वे सर्व्वमङ्गलायाः स्थानं गताः। तत्र सर्व्वमङ्गलां सम्पूज्य वीरवरो ब्रूते, देवि, प्रसीद, विजयतां विजयतां शूद्रको महाराजः, गृह्यतामुपहारः, इत्युक्ता पुत्रस्य शिरश्चिच्छेद। ततो वीरवरश्चिन्तयामास, गृहीतराजवर्त्तनस्य निस्तारः कृतः, अधुना निष्पुत्रस्य जीवनमलमित्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोचात्मनः शिरश्छेदः कृतः। ततः स्त्रियापि स्वामिपुत्त्रशोकार्त्तया तदनुष्ठितम्। तत् सर्व्वं दृष्ट्वा राजा साश्चर्य्यं चिन्तयामास—

जीवन्ति च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः।
अनेन सदृशो लोके न भूतो न भविष्यति ॥ २ ॥

तदेतेन परित्यक्तेन मम राज्येनापि अप्रयोजनम्। ततः शूद्रकेनापि स्वशिरश्छेत्तुं खड्गः समुत्थापितः। अथ भगवत्या सर्व्वमङ्गलया प्रत्यक्षभूतया राजा हस्ते धृत उक्तश्च, पुत्त्र, प्रसन्नास्मि, अलं साहसेन, जीवनान्तेऽपि तव राज्यभङ्गो नास्ति। राजा च साष्टाङ्गपातं प्रणम्योवाच, देवि, किं मे राज्येन, जीवितेन वा किं प्रयोजनम्. यद्यहमनुकम्पनीयस्तदा ममायुःशेषेण अयं सदारपुत्त्रो वीरवरो जीवतु, अन्यथाहं यथाप्राप्तां गतिं गच्छामि। भगवत्युवाच, पुत्त्र, अनेन ते सत्योत्कर्षेण भृत्यवात्सल्येन च सन्तुष्टास्मि, गच्छ, विजयी भव, अयमपि सपरिवारो राजपुत्त्रो जीवतु। इत्युक्त्वा देवी अदृश्याऽभवत्। ततो वीरवरः सपुत्त्रदारो गृहं गतः, राजापि तैरलक्षितः सत्वरमन्तःपुरं प्रविष्टः। अथ प्रभाते वीरवरो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वारस्थः पुनर्भूपालेन पृष्टः सन् आह, देव, सा रुदती स्त्री मामवलोक्यादृश्याऽभवत्, न कापि अन्या वार्त्ता विद्यते। तद्वचनमाकर्ण्य राजा अचिन्तयत्, कथमयं श्लाघ्यो महासत्त्वः। यतः—

प्रियं कुर्य्यादकृपणः शूरः स्यादविकत्थनः।
दाता नापात्रवर्षी च प्रगल्भः स्यादनिष्ठुरः॥ ३॥

एतन्महापुरुषलक्षणं एतस्मिन् सर्व्वमस्ति। ततः स राजा प्रातः शिष्टसभां कृत्वा सर्व्ववृत्तान्तं प्रस्तुत्य प्रसादात्तस्मै कर्णाटराज्यं ददौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामायणम् ।

सगरवंशोपाख्यानम् ।

अयोध्याधिपतिः श्रीमान् पूर्व्वमासीन्नराधिपः ।
सगरो नाम धर्म्मात्मा प्रजाकामः स चाप्रजः ॥ १ ॥
विदर्भराजदुहिता केशिनी नाम नामतः ।
ज्येष्ठा सगरपत्न्यासीद्धर्म्मिष्ठा सत्यवादिनी ॥ २ ॥
अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ।
द्वितीया सगरस्यासीत् पत्नी सुमतिसंज्ञिता ॥ ३ ॥
ताभ्यां सह महेष्वासः पत्नीभ्यां तप्तवांस्तपः ।
अपत्यकामः काकुत्स्थ भृगुप्रस्रवणे गिरौ ॥ ४ ॥
अथ वर्षशते पूर्णे तपसाराधितो मुनिः ।
सगराय वरं प्रादाद्भृगुः सत्यवतां वरः ॥ ५ ॥
अपत्यलाभः सुमहांस्तव राजन् भविष्यति ।
कीर्त्तिञ्चाप्रतिमां लोके सन्तानोत्थामवाप्स्यसि ॥ ६ ॥
एका जनयिता पुत्त्रं तव वंशविवर्द्धनम् ।
षष्टिं पुत्त्रसहस्राणि द्वितीया जनयिष्यति ॥ ७ ॥
मुनिमेवं भाषमाणं सत्यधर्म्मतपोनिधिम् ।
ते पत्न्यौ सगरस्येदं कृताञ्जलिमभाषताम् ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकं का तनयं ब्रह्मन् का बहून् जनयिष्यति ।
भगवन् श्रोतुमिच्छावः सत्यमस्तु वचस्तव ॥ ९ ॥
तयोस्तद्वचनं श्रुत्वा स मुनिप्रवरस्तदा ।
उवाच मधुरं वाक्यं स्वच्छन्देन विधीयताम् ॥ १० ॥
एका वंशधरं पुत्रमेका चावंशकान् बहून् ।
कीर्त्तिमतो महोत्साहान् का वा कं वरमिच्छति ॥ ११ ॥
मुनेरेतद्वचः श्रुत्वा केशिनी रघुनन्दन ।
पुत्रं वंशधरं राम जग्राहैकमनिन्दिता ॥ १२ ॥
षष्टिं पुत्रसहस्राणि सुपर्णभगिनी तदा ।
जग्राह कीर्त्तियुक्तानि सुमतिर्वरमीप्सितम् ॥ १३ ॥
ततः प्रदक्षिणं कृत्वा शिरसाभिप्रणम्य तम् ।
जगाम स्वपुरं राजा सभार्य्यो रघुनन्दन ॥ १४ ॥
अथ काले गते तस्य पुत्रं ज्येष्ठा व्यजायत ।
असमञ्जा इति ख्यातं केशिनी सगरात्मजम् ॥ १५ ॥
सुमतिस्तु रघुश्रेष्ठ गर्भं तुम्बं व्यसूयत ।
षष्टिः पुत्रसहस्राणि भिन्ने तुम्बे विनिर्ययुः ॥ १६ ॥
घृतपूर्णेषु कुम्भेषु धात्रयस्तान् समवर्द्धयन् ।
ते च कालेन महता यौवनं प्रतिपेदिरे ॥ १७ ॥
समानवयसः सर्व्वे तुल्यवीर्य्यपराक्रमाः ।
षष्टिः पुत्रसहस्राणां सगरस्य बभूव ह ॥ १८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स च ज्येष्ठोऽभवत् तेषामसमञ्जाः परन्तप ।
पौराणामहिते युक्तः पित्रा निर्व्वासितः पुरात् ॥ १९ ॥
तस्य पुत्रोऽंशुमान् नाम बभूव ह्यसमञ्जसः ।
सम्मतः सर्व्वलोकस्य सर्व्वलोकप्रियंवदः ॥ २० ॥
अथ कालेन महता मतिरेवमजायत ।
सगरस्याश्वमेधेन यजेयमिति राघव ॥ २१ ॥
स कृत्वा निश्चितां बुद्धिं सोपाध्यायगणो नृपः ।
सगरो यष्टुमारेभे कृत्वा द्रव्यपरिग्रहम् ॥ २२ ॥
विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः ।
उवाच परमप्रीतो मुनिं दीप्तमिवानलम् ॥ २३ ॥
श्रोतुमिच्छामि भगवन् विस्तरेण कथामिमाम् ।
पूर्व्वको मे यथा यज्ञं सगरः समवाप्तवान् ॥ २४ ॥
विश्वामित्रस्ततो राममुवाच प्रहसन्निव ।
श्रूयतां विस्तरो राम सगरस्य कथां प्रति ॥ २५ ॥
शङ्करश्वशुरः श्रीमान् हिमवानचलोत्तमः ।
विन्ध्यस्य स्पर्द्धयान्योऽन्यं यत्र देशे निरीक्षतः ॥ २६ ॥
तस्मिन् देशे स यज्ञोऽभूत् सगरस्य महात्मनः ।
स हि देशो महान् पुण्यः ख्यातः पुण्यजनाश्रितः ॥२७॥
तस्य चानुचरो राम दृढधन्वा महारथः ।
अंशुमानभवद्वीरः सगरस्य तदाज्ञया ॥ २८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यजतस्तस्य तं यज्ञमुत्थाय धरणीतलात् ।
तमश्वं यज्ञियं नागो जहारानन्तरूपवान् ॥ २९ ॥
हृतेऽश्वे यज्ञिये तस्मिन् सर्व्वे ते रघुनन्दन ।
याजकाः समुपागम्य यजमानं तदाब्रुवन् ॥ ३० ॥
केनापि नागरूपेण हृतस्तेऽश्वः स यज्ञियः ।
हत्वा तमश्वहर्त्तारं तमेवाश्वं त्वमानय ॥ ३१ ॥
यज्ञच्छिद्रं महद्धेतत् सर्व्वेषामशिवाय नः ।
तत् तथा क्रियतां राजन् यथाच्छिद्रः क्रतुर्भवेत् ॥३२॥
उपाध्यायवचः श्रुत्वा तस्मिन् सदसि पार्थिवः ।
षष्टिं पुत्त्रसहस्राणि समाहूयेदमब्रवीत् ॥ ३३ ॥
अनागतिं राक्षसानां पश्यामीह महाक्रतौ ।
नागानाञ्चापि यज्ञोऽयं रक्ष्यते हि महर्षिभिः ॥ ३४ ॥
केनापि तु स देवेन हृतोऽश्वो नागरूपिणा ।
अमर्षताच्छिद्रमेतं दृष्ट्वा दीक्षामुपागतम् ॥ ३५ ॥
योऽसौ रसातलगतो यदि वान्तर्जले स्थितः ।
तं हत्वा नयताश्वं मे पुत्त्रका भद्रमस्तु वः ॥ ३६ ॥
समुद्रमालिनीं कृत्स्नां पृथिवीमनुमार्गत ।
प्रोत्खनन्तः प्रयत्नेन यावत् तुरगदर्शनम् ॥ ३७ ॥
एकैकं योजनं भूमेर्निर्भिन्दन्तोऽनुगच्छत ।
अस्माकमश्वहर्त्तारं मार्गमाणा ममाज्ञया ॥ ३८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीक्षितः पौत्रसहितः सोपाध्यायगणस्त्वहम् ।
इह स्थास्यामि भद्रं वो यावत् तुरगदर्शनम् ॥ ३९ ॥
असमाप्तक्रतुस्तावद्भविष्यामीह पुत्रकाः ।
युष्माभिर्यावदश्वो मे न प्रत्याक्रियते पुनः ॥ ४० ॥
इत्युक्ता हृष्टमनसः पित्राथ सगरेण ते ।
बिभिदुर्वसुधां राम पितुर्वचनकारिणः ॥ ४१ ॥
योजनायामविस्तारमेकैकं धरणीतलम् ।
बिभिदुः पुरुषव्याघ्रा वज्रसारभुजैर्बलात् ॥ ४२ ॥
कुद्दालैः परिघैः शूलैर्मुषलैः शक्तिभिस्तथा ।
भिद्यमाना वसुमती तैरार्त्तेव ननाद सा ॥ ४३ ॥
नागानां वध्यमानानां सर्पाणाञ्च महौजसाम् ।
रक्षसामसुराणाञ्च बभूवार्त्तस्वनो महान् ॥ ४४ ॥
षष्टिं हि योजनानां ते सहस्राणि महौजसः ।
धरणीं बिभिदुः क्रुद्धाः सर्व्वे यावद्रसातलम् ॥ ४५ ॥
एवं पर्व्वतसंबाधं जम्बूद्वीपं नृपात्मज ।
खनन्तस्ते नृपसुताः सर्व्वतः परिबभ्रमुः ॥ ४६ ॥
ततो देवाः सगन्धर्व्वा महोरगगणास्तथा ।
सम्भ्रान्तमनसः सर्व्वे पितामहमुपाद्रवन् ॥ ४७ ॥
तेऽभिवाद्य महात्मानं सम्भ्रान्तमनसः सुराः ।
अब्रुवन् परमत्रस्ताः पितामहमिदं वचः ॥ ४८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवन् पृथिवी सर्व्वा खन्यते सगरात्मजैः ।
खनद्भिश्चैव तैर्ब्रह्मन् महासत्त्ववधः कृतः ॥ ४९ ॥
अयं स यज्ञहास्माकमनेनाश्वोऽपहारितः ।
इति ते सर्व्वभूतानि निघ्नन्ति सगरात्मजाः ॥ ५० ॥
एतच्छ्रुत्वा महावीर्य्य समाधिं कर्त्तुमर्हसि ।
यावत् त्वत्प्राणिनः सर्व्वान्न हिंसन्त्यश्वसारिणः ॥५१॥
इति तेषां वचः श्रुत्वा देवतानां पितामहः ।
प्रत्युवाच भयोद्विग्नान् सर्व्वदेवानिदं वचः ॥ ५२ ॥
बिभर्त्ति यो जगत् कृत्स्नं यस्योत्पत्तिर्न विद्यते ।
तेनाश्वो वासुदेवेन कपिलेनापवाहितः ॥ ५३ ॥
पृथिव्याश्चैव भेदोऽयं दृष्टस्तेनेति मे मतिः ।
सगरस्य च पुत्राणां विनाशोऽमिततेजसाम् ॥ ५४ ॥
पितामहवचः श्रुत्वा ततस्ते त्रिदिवालयाः ।
देवर्षिपितृगन्धर्व्वाः प्रतिजग्मुर्यथागतम् ॥ ५५ ॥
सगरस्य च पुत्राणां प्रादुरासीन्महौजसाम् ।
खनतां पृथिवीं शब्दो निर्घातसमनिस्वनः ॥ ५६ ॥
ते भित्त्वा पृथिवीं सर्व्वां कृत्वा चापि प्रदक्षिणम् ।
उपेत्य सागराः सर्व्वे पितरं वाक्यमब्रुवन् ॥ ५७ ॥
परिक्रान्ता मही सर्व्वा महद्विशसनं कृतम् ।
यादोगणमहाग्राहदैत्यदानवरक्षसाम् ॥ ५८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न चापश्याम तं राजन् यज्ञविघ्नकरं तव ।
किं कुर्म्म हे पुनस्तात विनिश्चित्य प्रशाधि नः ॥५८॥
तेषामेतद्वचः श्रुत्वा पुत्त्राणां सगरस्तदा ।
निश्चित्योवाच सर्व्वांस्तान् पुनः पुत्त्रानिदं वचः ॥६०॥
भूयो मृगयताश्वं मे विभिद्येदं रसातलम् ।
अश्वहर्त्तारमासाद्य कृतार्थाश्च निवर्त्तत ॥ ६१ ॥
पितुरेतद्वचः श्रुत्वा सगरस्यात्मसम्भवाः ।
सर्व्वतः षष्टिसाहस्रा रसातलमुपाद्रवन् ॥ ६२ ॥
खनन्तस्ते पुनस्तत्र ददृशुः पर्व्वतोपमम् ।
दिशो गजं विरूपाक्षं धारयन्तमिमां महीम् ॥ ६३ ॥
शिरसा नरशार्दूल सशैलवनप्रान्तराम् ।
नानाजनपदाकीर्णां नानापत्तनशोभिताम् ॥ ६४ ॥
यदा च पर्व्वणि गजः खेदाच्चालयते शिरः ।
सपर्व्वतवना राम तदेयं चलति क्षमा ॥ ६५ ॥
तं ते प्रदक्षिणं कृत्वा दिशां पालं महागजम् ।
मानयन्तो हि ते राम जग्मुर्भित्वा रसातलम् ॥ ६६ ॥
ततः पूर्व्वां परित्यज्य दक्षिणां बिभिदुर्दिशम् ।
दक्षिणस्यामपि पुनर्ददृशुस्ते गजोत्तमम् ॥ ६७ ॥
महापद्मं महात्मानं तिष्ठन्तं मन्दरोपमम् ।
शिरसा धारयन्तं गां विस्मयं परमं ययुः ॥ ६८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्वा तमपि नागेन्द्रं प्रदक्षिणमरिन्दम।
सगरस्यात्मजाः सर्व्वे पश्चिमां बिभिदुर्द्दिशम् ॥ ६९ ॥
पश्चिमायामपि दिशि कैलासशिखरोपमम्।
आशागजं सौमनसं ददृशुस्ते महाबलम् ॥ ७० ॥
तं ते प्रदक्षिणं कृत्वा पृष्ट्वा चानामयं ततः।
औत्खनन्तो ययुर्वीरा दिशं हैमवतीं तदा ॥ ७१ ॥
उत्तरस्यां रघुश्रेष्ठ ददृशुर्हिमपाण्डुरम्।
भद्रं भद्रेण वपुषा धारयन्तं महीमिमाम् ॥ ७२ ॥
समालभ्य ततः सर्व्वे कृत्वा चैनं प्रदक्षिणम्।
षष्टिः पुत्रसहस्राणि बिभिदुर्वसुधातलम् ॥ ७३ ॥
ततः प्रागुत्तरामाशां गत्वा ते सगरात्मजाः।
अमर्षवशमापन्नाश्चाखनन् धरणीमिमाम् ॥ ७४ ॥
ते तु सर्व्वे महात्मानो भीमवेगा महाबलाः।
ददृशुः कपिलं तत्र वासुदेवं सनातनम् ॥ ७५ ॥
हयञ्च तस्य देवस्य चरन्तमविदूरतः।
प्रहर्षमतुलम्प्राप्ताः सर्व्वे ते रघुनन्दन ॥ ७६ ॥
ते तं हयहरं मत्वा क्रोधपर्य्याकुलेक्षणाः।
अभ्यधावन्त संक्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन् ॥ ७७ ॥
अस्माकं त्वं हि यज्ञीयं तुरगं हृतवानसि।
दुर्म्मेधस्त्वं हि सम्प्राप्तान् विद्धि नः सगरात्मजान् ॥ ७८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुत्वा तद्वचनं तेषां कपिलो रघुनन्दन ।
रोषेण महताविष्टो हुङ्कारमकरोत्तदा ॥ ७९ ॥
ततस्तेनाप्रमेयेण कपिलेन महात्मना ।
भस्मराशीकृताः सर्व्वे काकुत्स्थ सगरात्मजाः ॥ ८० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मार्कण्डेय-पुराणम् ।

हरिश्चन्द्रोपाख्यानम् ।

धर्म्मपक्षिण ऊचुः ।

हरिश्चन्द्रेति राजर्षिरासीत् त्रेतायुगे पुरा ।
धर्म्मात्मा पृथिवीपालः प्रोल्लसत्कीर्त्तिरुत्तमः ॥ १ ॥
न दुर्भिक्षं न च व्याधिर्नाकालमरणं नृणाम् ।
नाधर्म्मरुचयः पौरास्तस्मिन् शासति पार्थिवे ॥ २ ॥
स कदाचिन्महाबाहुररण्येऽनुसरन् मृगम् ।
शुश्राव शब्दमसकृत् त्रायस्वेति च योषिताम् ॥ ३ ॥
स विहाय मृगं राजा मा भैषीरित्यभाषत ।
मयि शासति दुर्म्मेधाः कोऽयमन्यायवृत्तिमान् ॥ ४ ॥
तत्क्रन्दितानुसारी च सर्व्वारम्भविघातकृत् ।
एतस्मिन्नन्तरे रौद्रो विघ्नराट् समचिन्तयत् ॥ ५ ॥
विश्वामित्रोऽयमतुलं तप आस्थाय वीर्य्यवान् ।
प्रागसिद्धा भवादीनां विद्याः साधयति व्रती ॥ ६ ॥
साध्यमानाः क्षमामौनचित्तसंयमिनाऽसुना ।
ता वै भयार्त्ताः क्रन्दन्ति कथं कार्य्यमिदं मया ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेजस्वी कौशिकः श्रेष्ठो वयमस्य सुदुर्बलाः।
क्रोशन्त्येतास्तथा भीता दुष्पारं प्रतिभाति मे॥ ८॥
अथवाऽयं नृपः प्राप्तो मा भैरिति वदन् मुहुः।
इममेव प्रविश्याशु साधयिष्ये यथेप्सितम्॥ ९॥
इति सञ्चिन्त्य रौद्रेण विघ्नराजेन वै ततः।
तेनाविष्टो नृपः कोपादिदं वचनमब्रवीत्॥ १०॥
कोऽयं बध्नाति वस्त्रान्ते पावकं पापकृन्नरः।
बलोष्णतेजसा दीप्ते मयि पत्यावुपस्थिते॥ ११॥
कोऽद्य मत्कार्म्मुकाक्षेपविदीपितदिगन्तरैः।
शरैर्विभिन्नसर्व्वाङ्गो दीर्घनिद्रां प्रवेक्ष्यति॥ १२॥
विश्वामित्रस्ततः क्रुद्धः श्रुत्वा तन्नृपतेर्वचः।
क्रुद्धे चर्षिवरे तस्मिन् नेशुर्विद्याः क्षणेन ताः॥ १३॥
स चापि राजा तं दृष्ट्वा विश्वामित्रं तपोनिधिम्।
भीतः प्रावेपतात्यर्थं सहसाश्वत्थपर्णवत्॥ १४॥
स दुरात्मन्निति यदा मुनिस्तिष्ठेति चाब्रवीत्।
ततः स राजा विनयात् प्रणिपत्याभ्यभाषत॥ १५॥
भगवन्नेष मे धर्म्मो नापराधो मम प्रभो।
न क्रोद्धुमर्हसि मुने निजधर्म्मरतस्य मे॥ १६॥
दातव्यं रक्षितव्यञ्च धर्म्मज्ञेन महीक्षिता।
चापञ्चोद्यम्य योद्धव्यं धर्म्मशास्त्रानुसारतः॥ १७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वामित्र उवाच ।

दातव्यं कस्य के रक्ष्याः कैर्योऽद्धव्यश्च ते नृप ।
क्षिप्रमेतत् समाचक्ष्व यद्यधर्म्मभयं तव ॥ १८ ॥

हरिश्चन्द्र उवाच ।

दातव्यं विप्रमुख्येभ्यो ये चान्ये कृशवृत्तयः ।
रक्ष्या भीताः सदा युद्धं कर्त्तव्यं परिपन्थिभिः ॥ १९ ॥

विश्वामित्र उवाच ।

यदि राजा भवान् सम्यग्राजधर्म्ममवेक्षते ।
निर्व्वेष्टुकामो विप्रोऽहं दीयतामिष्टदक्षिणा ॥ २० ॥

पक्षिण ऊचुः ।

एतद्राजा वचः श्रुत्वा प्रहृष्टेनान्तरात्मना ।
पुनर्जातमिवात्मानं मेने प्राह च कौशिकम् ॥ २१ ॥
उच्यतां भगवन् यत् ते दातव्यमविशङ्कितम् ।
दत्तमित्येव तद्विद्धि यद्यपि स्यात् सुदुर्ल्लभम् ॥ २२ ॥
हिरण्यं वा सुवर्णं वा पुत्त्रः पत्नी कलेवरम् ।
प्राणा राज्यं पुरं लक्ष्मीर्यदभिप्रेतमात्मनः ॥ २३ ॥

विश्वामित्र उवाच ।

राजन् प्रतिगृहीतोऽयं यस्ते दत्तः प्रतिग्रहः ।
प्रयच्छ प्रथमं तावद्दक्षिणां राजसूयिकीम् ॥ २४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजोवाच ।

ब्रह्मंस्त्वामपि दास्यामि दक्षिणां भवते ह्यहम् ।
व्रियतां द्विजशार्दूल यस्तवेष्टः प्रतिग्रहः ॥ २५ ॥

विश्वामित्र उवाच ।

ससागरां धरामेतां सभूभृद्ग्रामपत्तनाम् ।
राज्यञ्च सकलं वीर रथाश्वगजसङ्कुलम् ॥ २६ ॥
कोष्ठागारञ्च कोषञ्च यच्चान्यद्विद्यते तव ।
विना भार्य्याञ्च पुत्त्रञ्च शरीरञ्च तवानघ ॥ २७ ॥
धर्म्मञ्च सर्व्वधर्म्मज्ञ यो यान्तमनुगच्छति ।
बहुना वा किमुक्तेन सर्व्वमेतत् प्रदीयताम् ॥ २८ ॥

पक्षिण ऊचुः ।

प्रहृष्टेनैव मनसा सोऽविकारमुखो नृपः ।
तस्यर्षेर्वचनं श्रुत्वा तथेत्याह कृताञ्जलिः ॥ २९ ॥

विश्वामित्र उवाच ।

सर्व्वस्वं यदि मे दत्तं राज्यमुर्व्वी बलं धनम् ।
प्रभुत्वं कस्य राजर्षे राज्यस्थे तापसे मयि ॥ ३० ॥

हरिश्चन्द्र उवाच ।

पूर्व्वं यस्मिन् न दत्ता ते काले राज्यवती मही ।
तस्मिन्नपि भवान् स्वामी किमुताद्य महीपतिः ॥ ३१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वामित्र उवाच ।

यदि राजंस्त्वया दत्ता मम सर्व्वा वसुन्धरा ।
यत्र मे विषये स्वाम्यं तस्मान्निष्क्रान्तुमर्हसि ॥ ३२ ॥
श्रोणीसूत्रादि सकलं मुक्ता भूषणसंग्रहम् ।
तरुवल्कलमाबध्य सह पत्न्या सुतेन च ॥ ३३ ॥

पक्षिण ऊचुः ।

तथेति चोक्ता कृत्वा च राजा गन्तुं प्रचक्रमे ।
स्वपत्न्या शैव्यया सार्द्धं बालकेनात्मजेन च ॥ ३४ ॥
व्रजतः स ततो रुद्ध्वा पन्थानं प्राह तं नृपम् ।
क्व यास्यसीत्यदत्त्वा मे दक्षिणां राजसूयिकीम् ॥ ३५ ॥

हरिश्चन्द्र उवाच ।

भगवन् राज्यमेतत् ते दत्तं निहतकण्टकम् ।
अवशिष्टमिदं ब्रह्मन्नद्य देहत्रयं मम ॥ ३६ ॥

विश्वामित्र उवाच ।

तथापि खलु दातव्या त्वया मे यज्ञदक्षिणा ।
विशेषतो ब्राह्मणानां हन्त्यदत्तं प्रतिश्रुतम् ॥ ३७ ॥
यावत् तोषो राजसूये ब्राह्मणानां भवेन्नृप ।
तावदेव तु दातव्या दक्षिणा राजसूयिकी ॥ ३८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिश्रुत्य च दातव्यं योद्धव्यञ्चाततायिभिः ।
रक्षितव्यास्तथा चार्त्तास्त्वयैव प्राक् प्रतिश्रुतम् ॥३९॥

हरिश्चन्द्र उवाच ।

भगवन् साम्प्रतं नास्ति दास्ये कालक्रमेण ते ।
प्रसादं कुरु विप्रर्षे सद्भावमनुचिन्त्य च ॥ ४० ॥

विश्वामित्र उवाच ।

किम्प्रमाणो मया कालः प्रतीक्ष्यस्ते जनाधिप ।
शीघ्रमाचक्ष्व शापाग्निरन्यथा त्वां प्रधक्ष्यति ॥ ४१ ॥

हरिश्चन्द्र उवाच ।

मासेन तव विप्रर्षे प्रदास्ये दक्षिणाधनम् ।
साम्प्रतं नास्ति मे वित्तमनुज्ञां कर्त्तुमर्हसि ॥ ४२ ॥

विश्वामित्र उवाच ।

गच्छ गच्छ नृपश्रेष्ठ स्वधर्म्ममनुपालय ।
शिवश्च तेऽध्वा भवतु मा सन्तु परिपन्थिनः ॥ ४३ ॥

पक्षिण ऊचुः ।

तं सभार्य्यं नृपश्रेष्ठं निर्यान्तं ससुतं पुरात् ।
दृष्ट्वा प्रचुक्रुशुः पौरा राज्ञश्चैवानुयायिनः ॥ ४४ ॥
हा नाथ किं जहास्यस्मान् नित्यार्त्तिपरिपीड़ितान् ।
मुहूर्त्तं तिष्ठ राजेन्द्र भवतो मुखपङ्कजम् ।
पिबामो नेत्रभ्रमरैः कदा द्रक्ष्यामहे पुनः ॥ ४५।४६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य प्रयातस्य पुरो यान्ति पृष्ठे च पार्थिवाः ।
तस्यानुयाति भार्य्येयं गृहीत्वा बालकं सुतम् ॥ ४७ ॥
यस्य भृत्याः प्रयातस्य यान्त्यग्रे कुञ्जरस्थिताः ।
स एष पद्भ्यां राजेन्द्रो हरिश्चन्द्रोऽद्य गच्छति ॥४८॥
तिष्ठ तिष्ठ नृपश्रेष्ठ स्वधर्म्ममनुपालय ।
आनृशंस्यं परो धर्म्मः क्षत्त्रियाणां विशेषतः ॥ ४९ ॥
किं दारैः किं सुतैर्नाथ धनैर्धान्यैरथापि वा ।
सर्व्वमेतत् परित्यज्य छायाभूता वयं तव ॥ ५० ॥
इति पौरवचः श्रुत्वा राजा शोकपरिप्लुतः ।
अतिष्ठत् स तदा मार्गे तेषामेवानुकम्पया ॥ ५१ ॥
विश्वामित्रोऽपि तं दृष्ट्वा पौरवाक्याकुलीकृतम् ।
रोषामर्षविवृत्ताक्षः समागम्य वचोऽब्रवीत् ॥ ५२ ॥
धिक् त्वां दुष्टसमाचारमनृतं जिह्मभाषिणम् ।
मम राज्यञ्च दत्त्वा यः पुनः प्राक्रष्टुमिच्छसि ॥५३॥
इत्युक्तः परुषं तेन गच्छामीति सवेपथुः ।
ब्रुवन्नेवं ययौ शीघ्रमाकर्षन् दयितां करे ॥ ५४ ॥
अथ विश्वे तदा देवाः पञ्च प्राहुः कृपालवः ।
तदवस्थं कृतं दृष्ट्वा हरिश्चन्द्रं नरेश्वरम् ॥ ५५ ॥
विश्वामित्रः सुपापोऽयं लोकान् कान् समवाप्स्यति ।
येनायं यज्वनां श्रेष्ठः स्वराज्यादवरोपितः ॥ ५६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्य वा श्रद्धया पूतं सूतं सोमं महाध्वरे ।
पीत्वा वयं प्रयास्यामो मुदं मन्त्रपुरःसरम् ॥ ५७ ॥
इति तेषां वचः श्रुत्वा कौशिकोऽतिरुषान्वितः ।
शशाप तान् मनुष्यत्वं सर्व्वे यूयमवाप्स्यथ ॥ ५८ ॥
प्रसादितश्च तैः प्राह पुनरेव महामुनिः ।
मानुषत्वेऽपि भवतां भवित्री नैव सन्ततिः ॥ ५९ ॥
न दारसंग्रहश्चैव भविता न च मत्सरः ।
कामक्रोधविनिर्मुक्ताः भविष्यथ सुराः पुनः ॥ ६० ॥
विश्वामित्रवचः श्रुत्वा स राजा प्रययौ शनैः ।
शैव्ययानुगतो दुःखी भार्य्यया बालपुत्रया ॥ ६१ ॥
स गत्वा वसुधापालो दिव्यां वाराणसीं पुरीम् ।
नैषा मनुष्यभोग्येति शूलपाणेः परिग्रहः ॥ ६२ ॥
जगाम पद्भ्यां दुःखार्त्तः सह पत्न्यानुकूलया ।
पुरीप्रवेशे ददृशे विश्वामित्रमुपस्थितम् ॥ ६३ ॥

विश्वामित्र उवाच ।

पूर्णः स मासो राजर्षे ! दीयतां मम दक्षिणा ।
राजसूयनिमित्तं हि स्मर्य्यते स्ववचो यदि ॥ ६४ ॥

हरिश्चन्द्र उवाच ।

ब्रह्मन्नद्यैव सम्पूर्णो मासोऽम्लानतपोधन ।
तिष्ठत्येतद्दिनार्द्धं यत् तत् प्रतीक्षस्व मा चिरम् ॥ ६५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वामित्र उवाच ।

एवमस्तु महाराज आगमिष्याम्यहं पुनः ।
शापं तव प्रदास्यामि न चेदद्य प्रदास्यसि ॥ ६६ ॥

पक्षिण ऊचुः ।

इत्युक्त्वा प्रययौ विप्रो राजा चाचिन्तयत् तदा ।
कथमस्मै प्रदास्यामि दक्षिणा या प्रतिश्रुता ॥ ६७ ॥
राजानं व्याकुलं दीनं चिन्तयानमधोमुखम् ।
प्रत्युवाच तदा पत्नी वाष्पगद्गदया गिरा ॥ ६८ ॥
राजन् जातमपत्यं मे सतां पुत्त्रफलाः स्त्रियः ।
स मां प्रदाय वित्तेन देहि विप्राय दक्षिणाम् ॥६९॥
एतद्वाक्यमुपश्रुत्य ययौ मोहं महीपतिः ।
प्रतिलभ्य च संज्ञां स विललापातिदुःखितः ॥ ७० ॥
महद्दुःखमिदं भद्रे यत् त्वमेवं ब्रवीषि माम् ।
इत्युक्त्वा स नरश्रेष्ठो धिग्धिगित्यसकृदब्रुवन् ।
निपपात महीपृष्ठे मूर्च्छयाभिपरिप्लुतः ॥ ७१।७२ ॥
एतस्मिन्नन्तरे प्राप्तो विश्वामित्रो महातपाः ।
दृष्ट्वा तु तं हरिश्चन्द्रं पतितं भुवि मूर्च्छितम् ।
स वारिणा समभ्युच्य राजानमिदमब्रवीत् ॥७३।७४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वामित्र उवाच ।

उत्तिष्ठोत्तिष्ठ राजेन्द्र तां ददस्वेष्टदक्षिणाम् ।
ऋणं धारयतो दुःखमहन्यहनि वर्द्धते ।
दीयतां दक्षिणा सा मे यदि धर्म्ममवेक्षसे ॥७५।७६॥
सत्येनार्कः प्रतपति सत्ये तिष्ठति मेदिनी ।
सत्यञ्चोक्तं परो धर्म्मः स्वर्गः सत्ये प्रतिष्ठितः ॥ ७७ ॥
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ ७८ ॥
अथवा किं ममैतेन साम्ना प्रोक्तेन कारणम् ।
अनार्य्ये पापसङ्कल्पे क्रूरे चानृतवादिनि ।
त्वयि राज्ञि प्रभवति सद्भावः श्रूयतामयम् ॥ ७९।८०॥
अद्य मे दक्षिणां राजन् न दास्यति भवान् यदि ।
अस्ताचलं प्रयातेऽर्के शप्स्यामि त्वां ततो ध्रुवम् ॥८१॥
इत्युक्त्वा स ययौ विप्रो राजा चासीद्भयातुरः ।
भार्य्यास्य भूयः प्राहेदं क्रियतां वचनं मम ॥ ८२ ॥
मा शापानलनिर्दग्धः पञ्चत्वमुपयास्यसि ।
स तथा नोद्यमानस्तु राजा पत्न्या पुनः पुनः ।
प्राह भद्रे करोम्येष विक्रयं तव निर्घृणः ।
नृशंसैरपि यत् कर्त्तुं न शक्यं तत्करोम्यहम् ॥८३.८४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमुक्का ततो भार्य्यां गत्वा नगरमातुरः ।
वाष्पापिहितकण्ठाक्षस्ततो वचनमब्रवीत् ॥ ८५ ॥

राजोवाच ।

भो भो नागरिकाः सर्व्वे शृणुध्वं वचनं मम ।
किं मां पृच्छथ कस्त्वं भो नृशंसोऽहममानुषः ॥८६॥
राक्षसो वातिकठिनस्ततः पापतरोऽपि वा ।
विक्रेतुं दयितां प्राप्तो यो न प्राणांस्त्यजाम्यहम् ॥८७॥
यदि वः कस्यचित् कार्य्यं दास्या प्राणेष्टया मम ।
स ब्रवीतु त्वरायुक्तो यावत् सन्धारयाम्यहम् ॥ ८८ ॥

पक्षिण ऊचुः ।

अथ वृद्धो द्विजः कश्चिदागत्याह नराधिपम् ।
समर्पयस्व मे दासीमहं क्रेता धनप्रदः ॥ ८९ ॥
अस्ति मे वित्तमस्तोकं सुकुमारी च मे प्रिया ।
गृहकर्म्म न शक्नोति कर्त्तुमस्मात् प्रयच्छ मे ॥ ९० ॥
कर्म्मण्यतावयोरूपशीलानां तव योषितः ।
अनुरूपमिदं वित्तं गृहाणार्पय मेऽबलाम् ॥ ९१ ॥
ततः स विप्रो नृपतेर्वल्कलान्ते दृढं धनम् ।
बद्धा केशेष्वथादाय नृपपत्नीमकर्षयत् ॥ ९२ ॥
रुरोद रोहिताश्वोऽपि दृष्ट्वाकृष्टान्तु मातरम् ।
हस्तेन वस्त्रमाकर्षन् काकपक्षधरः शिशुः ॥ ९३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजपत्नुवाच ।

मुञ्चार्य्य मुञ्च तावन्मां यावत् पश्याम्यहं शिशुम् ।
दुर्लभं दर्शनं तात पुनरस्य भविष्यति ॥ ९४ ॥
पश्यैहि वत्स मामेवं मातरं दास्यतां गताम् ।
मां मा स्प्राक्षी राजपुत्त्र अस्पृश्याहं तवाधुना ॥९५॥
ततः स बालः सहसा दृष्ट्वाकृष्टान्तु मातरम् ।
समभ्यधावदम्बेति रुदन् सास्राविलेक्षणः ॥ ९६ ॥
तमागतं द्विजः क्रोधाद्बालमभ्याहनत् पदा ।
वदंस्तथापि सोऽम्बेति नैवामुञ्चत मातरम् । ९७ ॥

राजपत्नुवाच ।

प्रसादं कुरु मे नाथ क्रीणीष्वेमञ्च बालकम् ।
क्रीतापि नाहं भवतो विनैनं कार्य्यसाधिका ॥ ९८ ॥
इत्थं ममाल्पभाग्यायाः प्रसादसुमुखो भव ।
मां संयोजय बालेन वत्सेनेव पयस्विनीम् ॥ ९९ ।

ब्राह्मण उवाच ।

गृह्यतां वित्तमेतत्ते दीयतां बालको मम ।
स्त्रीपुंसोर्धर्म्मशास्त्रज्ञैः कृतमेव हि वेतनम् ।
शतं सहस्रं लक्षञ्च कोटिमूल्यं तथापरैः ॥ १०० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्षिण ऊचुः ।

तथैव तस्य तद्वित्तं बद्धोत्तरपटे ततः ।
प्रगृह्य बालकं मात्रा सहैकस्थमबन्धयत् ॥ १०१ ॥
नीयमानौ तु तौ दृष्ट्वा भार्य्यापुत्रौ स पार्थिवः ।
विललाप सुदुःखार्त्तो निश्वस्योष्णं पुनः पुनः ॥१०२॥
यां न वायुर्न चादित्यो नेन्दुर्न च पृथग्जनः ।
दृष्टवन्तः पुरा पत्नीं सेयं दासीत्वमागता ॥ १०३ ॥
सूर्य्यवंशप्रसूतोऽयं सुकुमारकराङ्गुलिः ।
सम्प्राप्तो विक्रयं बालो धिङ्मामस्तु सुदुर्म्मतिम् ॥१०४॥
हा प्रिये हा शिशो वत्स ममानार्य्यस्य दुर्नयैः ।
दैवाधीनां दशां प्राप्तो न मृतोऽस्मि तथापि धिक्॥१०५॥
एवं विलपतो राज्ञः स विप्रोऽन्तरधीयत ।
वृक्षगेहादिभिस्तुङ्गैस्तावादाय त्वरान्वितः ॥ १०६ ॥
विश्वामित्रस्ततः प्राप्तो नृपं वित्तमयाचत ।
तस्मै समर्पयामास हरिश्चन्द्रोऽपि तद्धनम् ॥ १०७ ॥
तद्वित्तं स्तोकमालोक्य दारविक्रयसम्भवम् ।
शोकाभिभूतं राजानं कुपितः कौशिकोऽब्रवीत् ॥ १०८॥
क्षत्रबन्धो ममेमां त्वं सदृशीं यज्ञदक्षिणाम् ।
मन्यसे यदि तत् क्षिप्रं पश्य त्वं मे बलं परम् ॥१०९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपसोऽत्र सुतप्तस्य ब्राह्मण्यस्यामलस्य च ।
मत्प्रभावस्य चोग्रस्य शुद्धस्याध्ययनस्य च ॥ ११० ॥

हरिश्चन्द्र उवाच ।

अर्धां दास्यामि भगवन् कालः कश्चित् प्रतीक्ष्यताम् ।
साम्प्रतं नास्ति विक्रीता पत्नी पुत्त्रश्च बालकः ॥१११॥

विश्वामित्र उवाच ।

चतुर्भागः स्थितो योऽयं दिवसस्य नराधिप ।
एष एव प्रतीक्ष्यो मे वक्तव्यं नोत्तरं त्वया ॥ ११२ ॥

पक्षिण ऊचुः ।

तमेवमुक्त्वा राजेन्द्रं निष्ठुरं निर्घृणं वचः ।
तदादाय धनं तूर्णं कुपितः कौशिको ययौ ॥ ११३ ॥
विश्वामित्रे गते राजा भयशोकाब्धिमध्यगः ।
सर्व्वाकारं विनिश्चित्य प्रोवाचोच्चैरधोमुखः ॥ ११४ ॥
वित्तक्रीतेन यो ह्यर्थी मया प्रेष्येण मानवः ।
स ब्रवीतु त्वरायुक्तो यावत् तपति भास्करः ॥ ११५ ॥
अथाजगाम त्वरितो धर्म्मश्चण्डालरूपधृक् ।
दुर्गन्धो विकृतो रुक्षः श्मश्रुलो दन्तुरो घृणी ।
कृष्णो लम्बोदरः पिङ्गरुक्षाक्षः परुषाक्षरः ।
गृहीतपक्षिपुञ्जश्च शवमाल्यैरलङ्कृतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपालहस्तो दीर्घास्यो भैरवोऽतिवदन् मुहुः ।
श्वगणाभिवृतो घोरो यष्टिहस्तो निराकृतिः ॥
११६—११८ ॥

चण्डाल उवाच ।

अहमर्थी त्वया शीघ्रं कथयस्वात्मवेतनम् ।
स्तोकेन बहुना वापि येन वै लभ्यते भवान् ॥ ११९ ॥

पक्षिण ऊचुः ।

तं तादृशमथालक्ष्य क्रूरदृष्टिं सुनिष्ठुरम् ।
वदन्तमतिदुःशीलं कस्त्वमित्याह पार्थिवः ॥ १२० ॥

चण्डाल उवाच ।

चण्डालोऽहमिहाख्यातः प्रवीरेति पुरोत्तमे ।
विख्यातो वध्यवधको मृतकम्बलहारकः ॥ १२१ ॥

हरिश्चन्द्र उवाच ।

नाहं चण्डालदासत्वमिच्छेयं सुविगर्हितम् ।
वरं शापाग्निना दग्धो न चण्डालवशं गतः ॥ १२२ ॥

पक्षिण ऊचुः ।

तस्यैवं वदतः प्राप्तो विश्वामित्रस्तपोनिधिः ।
कोपामर्षविवृत्ताक्षः प्राह चेदं नराधिपम् ॥ १२३ ॥
चण्डालोऽयमनल्पं ते दातुं वित्तमुपस्थितः ।
कस्मान्न दीयते मह्यमशेषा यज्ञदक्षिणा ॥ १२४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिश्चन्द्र उवाच ।

भगवन् सूर्य्यवंशोत्थमात्मानं वेद्मि कौशिक ।
कथं चण्डालदासत्वं गमिष्ये वित्तकामुकः ॥ १२५ ॥

विश्वामित्र उवाच ।

यदि चण्डालवित्तं त्वमात्मविक्रयजं मम ।
न प्रदास्यसि कालेन शप्स्यामि त्वामसंशयम् ॥ १२६ ॥

पक्षिण ऊचुः ।

हरिश्चन्द्रस्ततो राजा चिन्तावस्थितजीवितः ।
प्रसीदेति वदन् पादावृषेर्जग्राह विह्वलः ॥ १२७ ॥

हरिश्चन्द्र उवाच ।

दासोऽस्म्यार्त्तोऽस्मि भीतोऽस्मि त्वद्भक्तश्च विशेषतः ।
कुरु प्रसादं विप्रर्षे कष्टश्चण्डालसङ्करः ॥ १२८ ॥
भवेयं वित्तशेषेण सर्व्वकर्म्मकरो वशः ।
तवैव मुनिशार्दूल प्रेष्यश्चित्तानुवर्त्तकः ॥ १२९ ॥

विश्वामित्र उवाच ।

यदि प्रेष्यो मम भवान् चण्डालाय ततो मया ।
दासभावमनुप्राप्तो दत्तो वित्तार्ब्बुदेन वै ॥ १३० ॥

पक्षिण ऊचुः ।

एवमुक्ते तदा तेन श्वपाको हृष्टमानसः ।
विश्वामित्राय तद्द्रव्यं दत्त्वा बद्धा नरेश्वरम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डप्रहारसम्भ्रान्तमतीवव्याकुलेन्द्रियम्।
इष्टबन्धुवियोगार्त्तमनयन्निजपत्तनम्॥ १३१।१३२॥
हरिश्चन्द्रस्ततो राजा वसंश्चण्डालपत्तने।
प्रातर्मध्याह्नसमये सायञ्चैतदगायत॥ १३३॥
बाला दीनमुखो दृष्ट्वा बालं दीनमुखं पुरः।
मां स्मरत्यसुखाविष्टा मोचयिष्यति नौ नृपः॥
उपात्तवित्तो विप्राय दत्त्वा वित्तमतोऽधिकम्।
न सा मां मृगशावाक्षी वेत्ति पापतरं कृतम्॥१३४-३५॥
राज्यनाशः सुहृत्त्यागो भार्य्यातनयविक्रयः।
प्राप्ता चण्डालता चेयमहो दुःखपरम्परा॥ १३६॥
एवं स निवसन् नित्यं सस्मार दयितं सुतम्।
भार्य्याञ्चात्मसमामिष्टां हृतसर्व्वस्व आतुरः॥ १३७॥
कस्यचित्त्वथ कालस्य मृतचेलापहारकः।
हरिश्चन्द्रोऽभवद्राजा श्मशाने तद्वशानुगः॥ १३८॥
चण्डालेनानुशिष्टश्च मृतचेलापहारिणा।
शवागमनमन्विच्छन्निह तिष्ठ दिवानिशम्॥ १३९॥
इदं राज्ञेऽपि देयञ्च षड्भागन्तु शवं प्रति।
त्रयस्तु मम भागाः स्युर्द्वौ भागौ तव वेतनम्।
इति प्रतिसमादिष्टो जगाम शवमन्दिरम्।
दिशन्तु दक्षिणां यत्र वाराणस्यां स्थितं तदा॥१४०-४१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्मशानं घोरसंनादं शिवाशतसमाकुलम् ।
शवमौलिसमाकीर्णं दुर्गन्धं बहुधूमकम् ।
पिशाचभूतवेतालडाकिनीयक्षसङ्कुलम् ।
गृध्रगोमायुसङ्कीर्णं श्ववृन्दपरिवारितम् ।
अस्थिसङ्घातसङ्कीर्णं महादुर्गन्धसङ्कुलम् ।
नानामृतसुहृन्नादरौद्रकोलाहलाकुलम् ।
हा पुत्र मित्र हा बन्धो भ्रातर्वत्स प्रियाद्य मे ।
हा पते भगिनि मातर्हा मातुल पितामह ।
मातामह पितः पौत्र क्व गतोऽस्येहि बान्धव ।
इत्येवं वदतां यत्र ध्वनिः संश्रूयते महान् ॥१४२-४६॥
स राजा तत्र सम्प्राप्तो दुःखितः शोचनोद्यतः ।
हा भृत्या मन्त्रिणो विप्राः क्व तद्राज्यं विधे गतम्॥१४७॥
हा शैव्ये पुत्र हा बाल मां त्यक्त्वा मन्दभाग्यकम् ।
विश्वामित्रस्य रोषेण गताः कुत्रापि ते मम ॥१४८॥
इत्येवं चिन्तयंस्तत्र चण्डालोक्तं पुनः पुनः ।
मलिनो रूक्षसर्वाङ्गः केशवान् गन्धवान् ध्वजी॥१४९॥
लकुटी कालकल्पश्च धावंश्चापि ततस्ततः ।
अस्मिन् शव इदं मूल्यं प्राप्तं प्राप्स्यामि चाप्युत॥१५०॥
इदं मम इदं राज्ञे मुख्यचण्डालके त्विदम् ।
इति धावन् दिशो राजा जीवन् योन्यन्तरं गतः॥१५१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीर्णकर्पटसुग्रन्थिकृतकन्थापरिग्रहः।
चिताभस्मरजोलिप्तमुखबाहूदराङ्घ्रिकः।
नानामेदोवसामज्जलिप्तपाण्यङ्गुलिः श्वसन्।
नानाशवौदनकृताहारतृप्तिपरायणः।
तदीयमाल्यसंश्लेषकृतमस्तकमण्डनः।
न रात्रौ न दिवा शेते हा हेति प्रवदन् मुहुः॥१५२-५४
एवं द्वादश मासास्तु नीताः शतसमोपमाः।
नष्टोत्साहो राज्यनाशात् श्मशाने निवसंस्तदा॥१५५॥
अथाजगाम स्वसुतं मृतमादाय लापिनी।
भार्या तस्य नरेन्द्रस्य सर्पदष्टं हि बालकम्॥ १५६॥
हा वत्स हा सुत शिशो इत्येवं वदती मुहुः।
कृशा विवर्णा विमनाः पांशुध्वस्तशिरोरुहा॥१५७॥
स तां रोरुदतीं भार्यां नाभ्यजानात्तु पार्थिवः।
चिरप्रवाससन्तप्तां पुनर्जातामिवाबलाम्॥ १५८॥
सापि तं चारुकेशान्तं पुरा दृष्ट्वा जटालकम्।
नाभ्यजानान्नृपसुता शुष्कवृक्षोपमं नृपम्॥ १५९॥
सोऽपि कृष्णपटे बालं दृष्ट्वाशीविषपीड़ितम्।
नरेन्द्रलक्षणोपेतं चिन्तामाप नरेश्वरः॥ १६०॥
एवं दृष्ट्वा हि मे बालं मातुरुत्सङ्गशायिनम्।
स्मृतिमभ्यागतो बालो रोहिताश्वोऽब्जलोचनः॥१६१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोऽप्येतामेव मे वत्सो वयोऽवस्थामुपागतः ।
नीतो यदि न घोरेण कृतान्तेनात्मनो वशम् ॥१६२॥

राजपत्नुवाच ।

हा वत्स कस्य पापस्य अपध्यानादिदं महत् ।
दुःखमापतितं घोरं यस्यान्तो नोपलभ्यते ॥ १६३ ॥
हा नाथ राजन् भवता मामनाश्वास्य दुःखिताम् ।
क्वापि सन्तिष्ठता स्थाने विस्रब्धं स्थीयते कथम्॥१६४॥
राज्यनाशः सुहृत्त्यागो भार्य्यातनयविक्रयः ।
हरिश्चन्द्रस्य राजर्षेः किं विधे न कृतं त्वया ॥ १६५ ॥
इति तस्या वचः श्रुत्वा राजा स्वस्थानतश्च्युतः ।
प्रत्यभिज्ञाय दयितां पुत्त्रञ्च निधनं गतम् ॥ १६६ ॥
कष्टं शैव्येयमेषा हि स बालोऽयमितीरयन् ।
रुरोद दुःखसन्तप्तो मूर्च्छामभिजगाम च ॥ १६७ ॥
सा च तं प्रत्यभिज्ञाय तामवस्थामुपागतम् ।
मूर्च्छिता निपपातार्त्ता निश्चेष्टा धरणीतले ॥१६८॥
चेतः सम्प्राप्य राजेन्द्रो राजपत्नी च तौ समम् ।
विलेपतुः सुसन्तप्तौ शोकभारावपीड़ितौ ॥ १६९ ॥

राजोवाच ।

प्रिये न रोचये दीर्घं कालं क्लेशमुपासितुम् ।
नात्मायत्तश्च तन्वङ्गि पश्य मे मन्दभाग्यताम् ॥१७०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चण्डालेनाननुज्ञातः प्रवेक्ष्ये ज्वलनं यदि ।
चण्डालदासतां यास्ये पुनरप्यन्यजन्मनि ॥ १७१ ॥
नरके च पतिष्यामि कीटकृमिभोजनः ।
वैतरण्यां महापूयवसासृक्स्नायुपिच्छिले ।
असिपत्रवनं प्राप्य छेदं प्राप्स्यामि दारुणम् ।
तापं प्राप्स्यामि वा प्राप्य महारौरवरौरवौ ।
कथं प्राणान् विमुञ्चामि परायत्तोऽस्मि दुर्गतः१७२-७३
अथवा नार्त्तिना क्लिष्टो नरः पापमवेक्षते ।
मग्नस्य दुःखजलधौ पारः प्राणवियोजनम् ॥१७४॥
एकोऽपि बालको योऽयमासीद्वंशकरः सुतः ।
मम दैवाम्बुवेगेन मग्नः सोऽपि बलीयसा ॥ १७५ ॥
तिर्य्यक्त्वे नास्ति तद्दुःखं नासिपत्रवने तथा ।
वैतरण्यां कुतस्तादृग्यादृशं पुत्त्रविप्लवे ॥ १७६ ॥
सोऽहं सुतशरीरेण दीप्यमाने हुताशने ।
निपतिष्यामि तन्वङ्गि चन्तव्यं कुकृतं मम ॥ १७७ ॥
अनुज्ञाता च गच्छ त्वं विप्रवेश्म शुचिस्मिते ।
मम वाक्यञ्च तन्वङ्गि निबोधादृतमानसा ॥ १७८ ॥
यदि दत्तं यदि हुतं गुरवो यदि तोषिताः ।
परत्र सङ्गमो भूयात् पुत्त्रेण सह च त्वया ॥ १७९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इह लोके कुतस्त्वेतद्भविष्यति ममेप्सितम् ।
त्वया सह मम श्रेयो गमनं पुत्त्रमार्गणे ॥ १८० ॥
यन्मया हसता किञ्चिद्रहस्ये वा शुचिस्मिते ।
कठोरमुक्तं तत् सर्व्वं क्षन्तव्यं मम याचतः ॥ १८१ ॥
राजपत्नीति गर्व्वेण नावज्ञेयः स ते द्विजः ।
सर्व्वयत्नेन ते तोष्यः स्वामिदैवतवच्छुभे ॥ १८२ ॥

राजपत्न्युवाच ।

अहमप्यत्र राजर्षे दीप्यमाने हुताशने ।
दुःखभारासहाद्यैव सह यास्यामि वै त्वया ॥ १८३ ॥

पक्षिण ऊचुः ।

ततः कृत्वा चितां राजा आरोप्य तनयं स्वकम् ।
भार्य्यया सहितश्चासौ बद्धाञ्जलिपुटः स्थितः ।
चिन्तयन् परमात्मानमीशं नारायणं हरिम् ।
हृत्कोटरगुहासीनं वासुदेवं सुरेश्वरम् ।
अनादिनिधनं ब्रह्म कृष्णं पीताम्बरं शुभम्॥१८४-८५॥
तस्य चिन्तयमानस्य सर्व्वे देवाः सवासवाः ।
धर्म्मं प्रमुखतः कृत्वा समाजग्मुस्त्वरान्विताः ॥१८६॥
आगत्य सर्व्वे प्रोचुस्ते भो भो राजन् शृणु प्रभो ।
अयं पितामहः साक्षाद्धर्म्मश्च भगवान् स्वयम् ॥१८७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साध्याश्च विश्वे मरुतो लोकपालाः सवाहनाः ।
नागाः सिद्धाश्च गन्धर्व्वा रुद्राश्चैव तथाश्विनौ ॥१८८॥
एते चान्ये च बहवो विश्वामित्रस्तथैव च ।
विश्वत्रयेण यो मित्रं कर्त्तुं न शकितः पुरा: ॥१८९॥

धर्म्म उवाच ।

मा राजन् साहसं कार्षीर्धर्म्मोऽहं त्वामुपागतः ।
तितिक्षादमसत्याद्यैस्त्वद्गुणैः परितोषितः ॥ १९० ॥

इन्द्र उवाच ।

हरिश्चन्द्र महाभाग प्राप्तः शक्रोऽस्मि तेऽन्तिकम् ।
त्वया सभार्य्यापुत्त्रेण जिता लोकाः सनातनाः॥१९१॥
आरोह त्रिदिवं राजन् भार्य्यापुत्त्रसमन्वितः ।
सुदुष्प्रापं नरैरन्यैर्जितमात्मीयकर्म्मभिः ॥ १९२ ॥

पक्षिण ऊचुः ।

ततोऽमृतमयं वर्षमपमृत्युविनाशनम् ।
इन्द्रः प्रासृजदाकाशाच्चितास्थानगतः प्रभुः ।
पुष्पवर्षञ्च सुमहत् देवदुन्दुभिनिस्वनम् ॥ १९३ ॥
ततस्ततो वर्त्तमाने समाजे देवसङ्कुले ।
समुत्तस्थौ ततः पुत्त्रो राज्ञस्तस्य महात्मनः ।
सुकुमारतनुः सुस्थः प्रसन्नेन्द्रियमानसः ॥ १९४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो राजा हरिश्चन्द्रः परिष्वज्य सुतं क्षणात्।
सभार्य्यः स्वश्रिया युक्तो दिव्यमाल्याम्बरान्वितः।
सुस्थः सम्पूर्णहृदयो मुदा परमया युतः।
बभूव तत्क्षणादिन्द्रो भूयश्चैनमभाषत॥ १९५-९६॥
सभार्य्यस्त्वं सपुत्रश्च प्राप्स्यसे सद्गतिं पराम्।
समारोह महाभाग निजानां कर्म्मणां फलैः॥१९७॥

हरिश्चन्द्र उवाच।

देवराजाननुज्ञातः स्वामिना श्वपचेन वै।
अगत्वा निष्कृतिं तस्य नारोक्ष्येऽहं सुरालयम्॥१९८॥

धर्म्म उवाच।

तवैनं भाविनं क्लेशमवगम्यात्ममायया।
आत्मा श्वपाकतां नीतो दर्शितं तच्च चापलम्॥१९९॥

इन्द्र उवाच।

प्रार्थ्यते यत् परं स्थानं समस्तैर्मनुजैर्भुवि।
तदारोह हरिश्चन्द्र स्थानं पुण्यकृतां नृणाम्॥२००॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्मपुराणम् ।

शिविराजोपाख्यानम् ।

शेष उवाच ।

अथाख्यास्ये महाभागः शिविरौशीनरो यथा ।
प्राप स्वर्गं महाराजः पुण्यात्मा भुवि विश्रुतः ॥ १ ॥
स चाश्वमेधं राजर्षिः शिविरौशीनरोऽकरोत् ।
यत्र यज्ञे महाभागा मुनयश्च तपोधनाः ।
पराशरो गालवोऽत्रिर्वशिष्ठो जाजलिस्तथा ।
पञ्चैते धर्म्मसहिता ऋत्विजो विजितेन्द्रियाः ।
अन्ये महर्षयः सर्व्वे सदस्याः सर्व्वतः स्थिताः ॥ २-३ ॥
यो यमिच्छति कामं वै शिविः सर्व्वमपूरयत् ।
नापूर्णकामस्तत्रासीत् यज्ञे तस्य महात्मनः ॥ ४ ॥
ग्रामान्रथान् गजानश्वान् कन्या दासीरलङ्कृताः ।
अददद्ब्राह्मणेभ्योऽसौ धेनूः शतसहस्रशः ॥ ५ ॥
सर्व्वे शशंसुस्तं यज्ञं महेन्द्रादतिशायनम् ।
देवाश्च सर्व्वे तत्रासन् मूर्त्तिमन्तो महाग्नयः ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षमाणस्तद्धर्म्मं महेन्द्रः श्येनतां गतः ।
कपोतरूपमग्निञ्च पर्य्यधावत वेगवान् ॥ ७ ॥
ऊरुं राज्ञः समासाद्य कपोतः श्येनजाद्भयात् ।
शरणार्थी महाभाग निलिल्ये भयविह्वलः ॥ ८ ॥
श्येनो वेगेन धावन् वै शिवेरूरुमुपाश्रितम् ।
दृष्ट्वा कपोतमुद्धृम्य राजानमिदमब्रवीत् ॥ ९ ॥
धर्म्मात्मासि महाराज सर्व्वैरेव त्वमुच्यसे ।
कथं धर्म्मविरुद्धं वै कर्म्माचरसि शत्रुहन् ॥ १० ॥
जन्तूनां विविधा राजन्नाहाराः परिकल्पिताः ।
तेन विश्वसृजा सृष्टेः प्रागेव परिमृष्यता ॥ ११ ॥
मनुष्याणां यथा ह्यन्नं देवानाममृतं तथा ।
पशूनाञ्च तृणान्येव व्याघ्रादीनाञ्च जन्तवः ।
पक्षिणाञ्च तथाहारः प्रतिजाति विशेषतः ॥ १२ ॥
तत्रास्माकं महाराज कपोताद्या निरूपिताः ।
आहारत्वेन तेनैव जीवनार्थं हि वेधसा ॥ १३ ॥
विहितं भक्षणं धात्रा पीड्यमानस्य वै क्षुधा ।
मा रक्षीद्धर्म्मलोभेन नैतद्धर्म्मस्य कारणम् ॥ १४ ॥
मम सप्त दिनान्येव क्षुधितस्य गतानि वै ।
निराहारस्य राजेन्द्र तद्भवाननुमोदताम् ॥ १५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिविरुवाच ।

त्रासितोऽयं त्वया पक्षी मामेष शरणं गतः ।
शरणागतमेनं हि कथं त्यक्ष्ये भयान्वितम् ।
एतस्य रक्षणे धर्म्मं महान्तं किं न पश्यसि ॥१६-१७॥
पस्पन्दमानः सम्भ्रान्तः कपोतः श्येन जायते ।
जीवितार्थी ममाभ्यासे तस्य त्यागो विगर्हितः ॥१८॥
यत् पापं ब्रह्महत्यायां दोग्ध्रीं हत्वा च यद्भवेत् ।
शरणागतसन्त्यागे तदेव पातकं नृणाम् ॥ १९ ॥

श्येन उवाच ।

आहारात् सर्व्वभूतानि प्रभवन्ति महीपते ।
आहारेणैव वर्द्धन्ते आहारैः प्राणधारणम् ॥ २० ॥
स्रक्चन्दनानुलेपाद्यै-र्वसनाभरणादिभिः ।
न जीवो रक्षितुं शक्यो विनाहारेण पार्थिव ॥ २१ ॥
आहारेण विना प्राणा मम यास्यन्ति सम्प्रति ।
मां विना मम ये दाराः पुत्राश्च पितरौ तथा ।
सर्व्वे प्राणान् विमोक्ष्यन्ति विनाहारेण भूमिप ।
एकं कपोतं रक्षंस्त्वं हंसि प्राणान् बहूनपि ॥२२-२३॥
धर्म्मार्थमपि यत् कर्म्म धर्म्मानन्यान् प्रपीड़येत् ।
न स धर्म्म इति प्रोक्तो विधर्म्मः स महीपते ॥ २४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अविरोधेन यो धर्म्म उत्तमः स हि कीर्त्तितः।
विरोधिषु महीपाल विचार्य्य गुरुलाघवम्।
बाधो न यत्र दृश्येत तं धर्म्मं समुपाचरेत् ॥२५-२६॥
गुरुलाघवविज्ञानं धर्म्माधर्म्मेषु शस्यते।
यतो भूयांस्ततो राजन् वर्त्तितव्यं भवादृशैः ॥ २७ ॥

राजोवाच।

बहुकल्याणसंयुक्तं भाषसे वचनं खग।
सुपर्णः पक्षिराजस्त्वं नान्यो भवितुमर्हसि ॥ २८ ॥
तथा हि ते वचः सौम्य धर्म्मसन्तानसंयुतम्।
धर्म्मज्ञोऽसि महाभाग न तेऽस्त्यविदितं क्वचित्।
शरणागतसन्त्यागं कथं बह्वभिमन्यसे ॥ २९ ॥
आहारार्थं समारम्भो यदि तेऽयं विहङ्गम।
शक्यः कर्त्तुं मया सोऽपि बहुधैव तवाधुना ॥ ३० ॥
गौ वृषो वा वराहो वा मृगो वा महिषोऽपि वा।
यं यं कामयसे पक्षिन् तं ते सम्पादयाम्यहम्।
नैनं त्यक्तुमहं शक्ष्ये भयेन शरणागतम् ॥ ३१ ॥

श्येन उवाच।

न वराहं वृषं वापि न मृगान् महिषानथ।
भक्षयामि महाराज किं तैर्मे ये त्वदीरिताः ॥ ३२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधात्रा विहितो भक्ष्यः कपोतः क्षत्रियर्षभ ।
तं विहायाहममृतमपि भक्ष्यं न कामये ॥ ३३ ॥
तमुत्सृज महीपाल विधिना कल्पितं मम ।
श्येनः कपोतमत्तीति को न जानाति भूतले ॥३४॥

राजोवाच ।

राष्ट्रं शिवीनामृद्धिं वै ददामि तव खेचर ।
यच्च कामयसे कामं श्येन सर्व्वं ददामि ते ।
विनेमं पक्षिणं भीतं शरणार्थिनमागतम् ॥ ३५ ॥
येन कामेन ते पक्षिंस्त्याज्योऽयं हि कपोतकः ।
तद्वदस्व ददाम्येष तं कामं न कपोतकम् ॥ ३६ ॥

श्येन उवाच ।

महाराज कपोते ते यदि स्नेहोऽधिको भवेत् ।
आत्मनो मांसमुत्कृत्य कपोतेन तुलार्पितम् ।
समं कृत्वा ददस्वाद्य तेन तृप्तिर्भवेन्मम ॥ ३७-३८ ॥

राजोवाच ।

अनुग्रहमिमं मन्ये श्येन यन्माभिभाषसे ।
दास्यामि मांसं देहस्य कपोतेन तुलाधृतम् ॥ ३९ ॥

श्येन उवाच ।

अथ मांसं समुत्कृत्य राजा परमधार्म्मिकः ।
तुलयामास तुलया कपोतेन समं द्विज ॥ ४० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीयमाने ततो मांसे गात्रादुत्कृत्य भूभृता ।
अतिरिक्तः कपोतोऽभूत् भूयो मांसमदात् नृपः ॥४१॥
न पर्य्याप्तं यदा मांसं कपोतेन समं द्विज ।
निर्म्मांसोऽथ स भूपाल आरुरोह स्वयं तुलाम् ॥४२॥

श्येन उवाच ।

मा कार्षीः साहसं राजन्निन्द्रोऽहं समुपागतः ।
परीक्षितुं त्वां धर्म्मेषु कपोतोऽग्निरयं स्वयम् ॥ ४३ ॥
यदुत्कृत्य स्वमांसानि त्वया दत्तानि भूपते ।
एषा ते महती कीर्त्तिर्लोकानभिभविष्यति ॥ ४४ ॥
यावल्लोके मनुष्यास्तत् कथयिष्यन्ति पार्थिव ।
तावत् कीर्त्तिश्च वासश्च त्रिदिवे ते भविष्यति ॥ ४५ ॥
देहश्च ते महाराज नीरुजः प्रकृतो भवेत् ।
इत्युक्त्वा स महीपालमारुरोह दिवं पुनः ॥ ४६ ॥
अग्निः कपोतरूपञ्च विहाय नृपमब्रवीत् ।
साधु साधु महाराज कीर्त्तिस्ते विपुला भुवि ।
कृपालुस्त्वत्समो राजा न भूतो न भविष्यति ।
इत्युक्त्वान्तर्दधे विप्र राजापि कृतवान् क्रतुम् ॥४७-४८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभारतम् ।

सावित्र्युपाख्यानम् ।

आसीन्मद्रेषु धर्म्मात्मा राजा परमधार्म्मिकः ।
ब्रह्मण्यश्च महात्मा च सत्यसन्धो जितेन्द्रियः ॥ १ ॥
यज्वा दानपतिर्दक्षः पौरजानपदप्रियः ।
पार्थिवोऽश्वपतिर्नाम सर्व्वभूतहिते रतः ॥ २ ॥
क्षमावाननपत्यश्च सत्यवाग्विजितेन्द्रियः ।
अतिक्रान्तेन वयसा सन्तापमुपजग्मिवान् ॥ ३ ॥
अपत्यं कामयंश्चासौ तीव्रं नियममास्थितः ।
काले नियमिताहारो ब्रह्मचारी जितेन्द्रियः ॥ ४ ॥
हुत्वा शतसहस्रं स सावित्र्या राजसत्तम ।
षष्ठे षष्ठे तदा काले बभूव मितभोजनः ॥ ५ ॥
एतेन नियमेनासीद्वर्षाण्यष्टादशैव तु ।
पूर्णे त्वष्टादशे वर्षे सावित्री तुष्टिमभ्यगात् ॥ ६ ॥
रूपिणी तु तदा राजन् दर्शयामास तं नृपम् ।
अग्निहोत्रात् समुत्थाय हर्षेण महतान्विता ।
उवाच चैनं वरदा वचनं पार्थिवं तदा ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सावित्र्युवाच ।

ब्रह्मचर्य्येण शुद्धेन दमेन नियमेन च ।
सर्व्वात्मना च भक्त्या च तुष्टास्मि तव पार्थिव ॥ ८ ॥
वरं वृणीष्वाश्वपते मद्रराज यदीप्सितम् ।
न प्रमादश्च धर्म्मेषु कर्त्तव्यस्ते कथञ्चन ॥ ९ ॥

अश्वपतिरुवाच ।

अपत्यार्थः समारम्भः कृतो धर्म्मेप्सया मया ।
पुत्रा मे बहवो देवि भवेयुः कुलभाजनाः ॥ १० ॥
तुष्टासि यदि मे देवि वरमेतं वृणोम्यहम् ।
सन्तानः परमो धर्म्म इत्याहुर्मां द्विजातयः ॥ ११ ॥

सावित्र्युवाच ।

पूर्व्वमेव मया राजन्नभिप्रायमिमं तव ।
ज्ञात्वा पुत्रार्थमुक्तो वै भगवांस्ते पितामहः ॥ १२ ॥
प्रसादाच्चैव तस्मात्ते स्वयम्भुविहिताद्भुवि ।
कन्या तेजस्विनी सौम्य क्षिप्रमेव भविष्यति ॥ १३ ॥
उत्तरञ्च न ते किञ्चिद्व्याहर्त्तव्यं कथञ्चन ।
पितामहनिसर्गेण तुष्टा ह्येतद्ब्रवीमि ते ॥ १४ ॥

मार्कण्डेय उवाच ।

अन्तर्हितायां सावित्र्यां जगाम स्वपुरं नृपः ।
स्वराज्ये चावसद्वीरः प्रजा धर्म्मेण पालयन् ॥ १५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्मिंश्चित्तु गते काले महिषी धर्म्मचारिणी ।
राजीवलोचनां कन्यां सुषुवे सुमनोहराम् ।
क्रियाश्च तस्या मुदितश्चक्रे स नृपसत्तमः ॥ १६ ॥
सावित्र्या प्रीतया दत्ता सावित्र्या हुतया ह्यपि ।
सावित्रीत्येव नामास्याश्चक्रुर्विप्रास्तथा पिता ॥ १७ ॥
सा विग्रहवतीव श्रीर्व्यवर्द्धत नृपात्मजा ।
कालेन चापि सा कन्या यौवनस्था बभूव ह ॥ १८ ॥
तान्तु पद्मपलाशाक्षीं ज्वलन्तीमिव तेजसा ।
न कश्चिद्वरयामास तेजसा प्रतिवारितः ॥ १९ ॥
यौवनस्थान्तु तां दृष्ट्वा स्वां सुतां देवरूपिणीम् ।
अयाच्यमानाञ्च वरैर्नृपतिर्दुःखितोऽभवत् ॥ २० ॥

राजोवाच ।

पुत्रि प्रदानकालस्ते न च कश्चिद्वृणोति माम् ।
स्वयमन्विच्छ भर्त्तारं गुणैः सदृशमात्मनः ॥ २१ ॥
प्रार्थितः पुरुषो यश्च स निवेद्यस्त्वया मम ।
विमृश्याहं प्रदास्यामि वरय त्वं यथेप्सितम् ॥ २२ ॥
इदं मे वचनं श्रुत्वा भर्त्तुरन्वेषणे त्वर ।
देवतानां यथा वाच्यो न भवेयं तथा कुरु ॥ २३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मार्कण्डेय उवाच ।

एवमुक्त्वा दुहितरं तथा वृद्धांश्च मन्त्रिणः ।
व्यादिदेशानुयात्रञ्च गम्यतामित्यचोदयत् ॥ २४ ॥
साभिवाद्य पितुः पादौ व्रीडितेव तपस्विनी ।
पितुर्वचनमाज्ञाय निर्जगामाविचारितम् ॥ २५ ॥
सा हैमं रथमास्थाय स्थविरैः सचिवैर्वृता ।
तपोवनानि रम्याणि राजर्षीणां जगाम ह ॥ २६ ॥
मान्यानां तत्र वृद्धानां कृत्वा पादाभिवन्दनम् ।
वनानि क्रमशस्तात सर्व्वाण्येवाभ्यगच्छत ॥ २७ ॥
एवं तीर्थेषु सर्व्वेषु धनोत्सर्गं नृपात्मजा ।
कुर्व्वती द्विजमुख्यानां तं तं देशं जगाम ह ॥ २८ ॥
अथ मद्राधिपो राजा नारदेन समागतः ।
उपविष्टः सभामध्ये कथायोगेन भारत ॥ २९ ॥
ततोऽभिगम्य तीर्थानि सर्व्वाण्येवाश्रमांस्तथा ।
आजगाम पितुर्वेश्म सावित्री सह मन्त्रिभिः ॥ ३० ॥
नारदेन सहासीनं सा दृष्ट्वा पितरं शुभा ।
उभयोरेव शिरसा चक्रे पादाभिवादनम् ॥ ३१ ॥

नारद उवाच ।

क्व गताऽभूत् सुतेयं ते कुतश्चैवागता नृप ।
किमर्थं युवतीं भर्त्रे न चैनां सम्प्रयच्छसि ॥ ३२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्वपतिरुवाच ।

कार्य्येण खल्वनेनैव प्रेषिताद्यैव चागता ।
एतस्याः शृणु देवर्षे भर्त्तारं योऽनया वृतः ॥ ३३ ॥

मार्कण्डेय उवाच ।

सा ब्रूहि विस्तरेणेति पित्रा संनोदिता शुभा ।
दैवतस्येव वचनं प्रतिगृह्येदमब्रवीत् ॥ ३४ ॥

सावित्र्युवाच ।

आसीच्छाल्वेषु धर्म्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातः पश्चाच्चान्धो बभूव सः ॥ ३५ ॥
विनष्टचक्षुषस्तस्य बालपुत्त्रस्य धीमतः ।
सामीप्येन हृतं राज्यं छिद्रेऽस्मिन् पूर्व्ववैरिणा ॥ ३६ ॥
स बालवत्सया सार्द्धं भार्य्यया प्रस्थितो वनम् ।
महारण्यगतश्चापि तपस्तेपे महाव्रतः ॥ ३७ ॥
तस्य पुत्त्रः पुरे जातः संवृद्धश्च तपोवने ।
सत्यवाननुरूपो मे भर्त्तेति मनसा वृतः ॥ ३८ ॥

नारद उवाच ।

अहो वत महत्पापं सावित्र्या नृपते कृतम् ।
अजानन्त्या यदनया गुणवान् सत्यवान् वृतः ॥ ३९ ॥
सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ।
ततोऽस्य ब्राह्मणाश्चक्रुर्नामैतत् सत्यवानिति ॥ ४० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजोवाच ।

अपीदानीं स तेजस्वी बुद्धिमान् वा नृपात्मजः ।
क्षमावानपि वा शूरः सत्यवान् पितृवत्सलः ॥ ४१ ॥

नारद उवाच ।

विवस्वानिव तेजस्वी बृहस्पतिसमो मतौ ।
महेन्द्र इव शूरश्च वसुधेव क्षमान्वितः ॥ ४२ ॥

अश्वपतिरुवाच ।

अपि राजात्मजो दाता ब्रह्मण्यश्चापि सत्यवान् ।
रूपवानप्युदारो वाप्यथवा प्रियदर्शनः ॥ ४३ ॥

नारद उवाच ।

सांकृते रन्तिदेवस्य स्वशक्त्या दानतः समः ।
ब्रह्मण्यः सत्यवादी च शिविरौशीनरो यथा ॥ ४४ ॥
ययातिरिव चोदारः सोऽभवत् प्रियदर्शनः ।
रूपेणान्यतमोऽश्विभ्यां द्युमत्सेनसुतो बली ॥ ४५ ॥
स दान्तः स मृदुः शूरः स सत्यः संयतेन्द्रियः ।
स मैत्रः सोऽनसूयश्च स ह्रीमान् द्युतिमांश्च सः ॥ ४६ ॥
नित्यशश्चार्जवं तस्मिन् स्थितिस्तस्यैव च ध्रुवा ।
संक्षेपतस्तपोवृद्धैः शीलवृद्धैश्च कथ्यते ॥ ४७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्वपतिरुवाच ।

गुणैरुपेतं सर्व्वैस्तं भगवन् प्रब्रवीषि मे ।
दोषानप्यस्य मे ब्रूहि यदि सन्तीह केचन ॥ ४८ ॥

नारद उवाच ।

एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति ।
स च दोषः प्रयत्नेन न शक्यश्चातिवर्त्तितुम् ॥ ४९ ॥
एको दोषोऽस्ति नान्योऽस्य सोऽद्यप्रभृति सत्यवान् ।
संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति ॥ ५० ॥

राजोवाच ।

एहि सावित्रि गच्छस्व अन्यं वरय शोभने ।
तस्य दोषो महानेको गुणानाक्रम्य च स्थितः ॥५१॥
यथा मे भगवानाह नारदो देवसत्कृतः ।
संवत्सरेण सोऽल्पायुर्देहन्यासं करिष्यति ॥ ५२ ॥

सावित्र्युवाच ।

दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा ।
सकृद्वृतो मया भर्त्ता न द्वितीयं वृणोम्यहम् ॥ ५३ ॥
मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।
क्रियते कर्म्मणा पश्चात् प्रमाणं मे मनस्ततः ॥ ५४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारद उवाच।

स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव।
नैषा वारयितुं शक्या धर्म्मादस्मात् कथञ्चन॥ ५५॥
नान्यस्मिन् पुरुषे सन्ति ये सत्यवति वै गुणाः।
प्रदानमेव तस्मान्मे रोचते दुहितुस्तव॥ ५६॥

राजोवाच।

अविचाल्यमेतदुक्तं तथ्यञ्च भवतो वचः।
करिष्याम्येतदेवञ्च गुरुर्हि भगवान् मम॥ ५७॥

नारद उवाच।

अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव।
साधयिष्याम्यहं तावत् सर्व्वेषां भद्रमस्तु वः॥ ५८॥

मार्कण्डेय उवाच।

एवमुक्त्वा खमुत्पत्य नारदस्त्रिदिवं गतः।
राजापि दुहितुः सज्जं वैवाहिकमकारयत्॥ ५९॥
अथ कन्याप्रदाने स तमेवार्थं विचिन्तयन्।
समानिन्ये च तत् सर्व्वं भाण्डं वैवाहिकं नृपः॥६०॥
ततो वृद्धान् द्विजान् सर्व्वान् ऋत्विजः सपुरोहितान्।
समाहूय दिने पुण्ये प्रययौ सह कन्यया॥ ६१॥
मेध्यारण्यं स गत्वा च द्युमत्सेनाश्रमं नृपः।
पद्भ्यामेव द्विजैः सार्द्धं राजर्षिं तमुपागमत्॥ ६२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रापश्यन्महाभागं शालवृक्षमुपाश्रितम् ।
कौश्यां वृष्यां समासीनं चक्षुर्हीनं नृपं तदा ॥ ६३ ॥
स राजा तस्य राजर्षेः कृत्वा पूजां यथार्हतः ।
वाचा सुनियतो भूत्वा चकारात्मनिवेदनम् ॥ ६४ ॥
तस्यार्घ्यमासनञ्चैव गाञ्चावेद्य स धर्म्मवित् ।
किमागमनमित्येवं राजा राजानमब्रवीत् ॥ ६५ ॥
तस्य सर्व्वमभिप्रायमितिकर्त्तव्यताञ्च ताम् ।
सत्यवन्तं समुद्दिश्य सर्व्वमेव न्यवेदयत् ॥ ६६ ॥

अश्वपतिरुवाच ।

सावित्री नाम राजर्षे कन्येयं मम शोभना ।
तां स्वधर्म्मेण धर्म्मज्ञ स्नुषार्थे त्वं गृहाण मे ॥ ६७ ॥

द्युमत्सेन उवाच ।

च्युताः स्म राज्याद्वनवासमाश्रिता-
श्चराम धर्म्मं नियतास्तपस्विनः ।
कथन्त्वनर्हा वनवासमाश्रमे
निवत्स्यते क्लेशमिमं सुता तव ॥ ६८ ॥

अश्वपतिरुवाच ।

सुखञ्च दुःखञ्च भवाभवात्मकं
यदा विजानाति सुताहमेव च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न मद्विधे युज्यति वाक्यमीदृशं
विनिश्चयेनाभिगतोऽस्मि ते नृप ॥ ६९ ॥
आशां नार्हसि मे हन्तुं सौहृदात् प्रणतस्य च ।
अभितः स्वागतं प्रेम्णा प्रत्याख्यातुं न मार्हसि ॥७०॥
अनुरूपो हि युक्तश्च त्वं ममाहं तवापि च ।
स्नुषां प्रतीच्छ मे कन्यां भार्य्यां सत्यवतः सतः ॥७१॥

द्युमत्सेन उवाच ।

पूर्व्वमेवाभिलषितः सम्बन्धो मे त्वया सह ।
भ्रष्टराज्यस्त्वहमिति तत एतद्विचारितम् ॥ ७२ ॥
अभिप्रायस्त्वयं यो मे पूर्व्वमेवाभिकाङ्क्षितः ।
स निवर्त्ततु मेऽद्यैव काङ्क्षितो ह्यसि मेऽतिथिः ॥७३॥

मार्कण्डेय उवाच ।

ततः सर्व्वान् समानाय्य द्विजानाश्रमवासिनः ।
यथाविधि समुद्वाहं कारयामासतुर्नृपौ ॥ ७४ ॥
दत्त्वा चाश्वपतिः कन्यां यथार्हं सपरिच्छदम् ।
ययौ स्वमेव भवनं युक्तः परमया मुदा ॥ ७५ ॥
सत्यवानपि तां भार्य्यां लब्ध्वा सर्व्वगुणान्विताम् ।
मुमुदे सा च तं लब्ध्वा भर्त्तारं मनसेप्सितम् ॥ ७६ ॥
गते पितरि सर्व्वाणि संन्यस्याभरणानि सा ।
जगृहे वल्कलान्येव वस्त्रं काषायमेव च ॥ ७७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिचारैर्गुणैश्चैव प्रश्रयेण दमेन च ।
सर्व्वकामक्रियाभिश्च सर्व्वेषां तुष्टिमादधे ॥ ७८ ॥
श्वश्रूं शरीरसत्कारैः सर्व्वैराच्छादनादिभिः ।
श्वशुरं देवसत्कारैर्वाचः संयमनेन च ॥ ७९ ॥
तथैव प्रियवादेन नैपुण्येन शमेन च ।
रहश्चैवोपचारेण भर्त्तारं पर्य्यतोषयत् ॥ ८० ॥
एवं तत्राश्रमे तेषां तदा निवसतां सताम् ।
कालस्तपस्यतां कश्चिदपाक्रामत भारत ॥ ८१ ॥
सावित्र्या ग्लायमानायास्तिष्ठन्त्यास्तु दिवानिशम् ।
नारदेन यदुक्तं तद्वाक्यं मनसि वर्त्तते ॥ ८२ ॥
ततः काले बहुतिथे व्यतिक्रान्ते कदाचन ।
प्राप्तः स कालो मर्त्तव्यं यत्र सत्यवता नृप ॥ ८३ ॥
चतुर्थेऽहनि मर्त्तव्यमिति सञ्चिन्त्य भाविनी ।
व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिताभवत् ॥ ८४ ॥
श्वोभूते भर्त्तृमरणे सावित्र्या भरतर्षभ ।
दुःखान्वितायास्तिष्ठन्त्याः सा रात्रिर्व्यत्यवर्त्तत ॥८५॥
अद्य तद्दिवसश्चेति हुत्वा दीप्तं हुताशनम् ।
युगमात्रोदिते सूर्य्ये कृत्वा पौर्व्वाह्णिकीः क्रियाः ।
ततः सर्व्वान् द्विजान् वृद्धान् श्वश्रूं श्वशुरमेव च ।
अभिवाद्यानुपूर्व्वेण प्राञ्जलिर्नियता स्थिता ॥८६-८७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवैधव्याशिषस्ते तु सावित्र्यर्थं हिताः शुभाः ।
ऊचुस्तपस्विनः सर्व्वे तपोवननिवासिनः ॥ ८८ ॥
एवमस्त्विति सावित्री ध्यानयोगपरायणा ।
मनसा ता गिरः सर्व्वाः प्रत्यगृह्णात्तपस्विनाम् ॥ ८९ ॥
तं कालं तं मुहूर्त्तञ्च प्रतीक्षन्ती नृपात्मजा ।
यथोक्तं नारदवचश्चिन्तयन्ती सुदुःखिता ॥ ९० ॥
ततस्तु श्वश्रूश्वशुरावूचतुस्तां नृपात्मजाम् ।
एकान्तमास्थितां वाक्यं प्रीत्या भरतसत्तम ॥ ९१ ॥

श्वशुरावूचतुः ।

व्रतं यथोपदिष्टं ते तथा तत्पारितं त्वया ।
आहारकालः सम्प्राप्तः क्रियतां यदनन्तरम् ॥ ९२ ॥

सावित्र्युवाच ।

अस्तं गते मयादित्ये भोक्तव्यं कृतकामया ।
एष मे हृदि संकल्पः समयश्च कृतो मया ॥ ९३ ॥

मार्कण्डेय उवाच ।

एवं सम्भाषमाणायाः सावित्र्या भोजनं प्रति ।
स्कन्धे परशुमादाय सत्यवान् प्रस्थितो वनम् ॥ ९४ ॥
सावित्री त्वाह भर्त्तारं नैकस्त्वं गन्तुमर्हसि ।
सह त्वया गमिष्यामि न हि त्वां हातुमुत्सहे ॥ ९५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यवानुवाच ।

वनं न गतपूर्व्वं ते दुःखः पन्थाश्च भाविनि ।
व्रतोपवासक्षामा च कथं पद्भ्यां गमिष्यसि ॥ ९६ ॥

सावित्र्युवाच ।

उपवासान्न मे ग्लानिर्नास्ति चापि परिश्रमः ।
गमने च कृतोत्साहां प्रतिषेद्धुं न मार्हसि ॥ ९७ ॥

सत्यवानुवाच ।

यदि ते गमनोत्साहः करिष्यामि तव प्रियम् ।
मम त्वामन्त्रय गुरू न मां दोषः स्पृशेदयम् ॥ ९८ ॥

मार्कण्डेय उवाच ।

साभिवाद्याब्रवीच्छ्वश्रूं श्वशुरञ्च महाव्रता ।
अयं गच्छति मे भर्त्ता फलाहारो महावनम् ॥ ९९ ॥
इच्छेयमभ्यनुज्ञाता आर्य्यया श्वशुरेण च ।
अनेन सह निर्गन्तुं न मेऽद्य विरहः क्षमः ॥ १०० ॥
गुर्व्वग्निहोत्रार्थकृते प्रस्थितश्च सुतस्तव ।
न निवार्य्यो निवार्य्यः स्यादन्यथा प्रस्थितो वनम् ॥ १०१ ॥
संवत्सरः किञ्चिदूनो न निष्क्रान्ताहमाश्रमात् ।
वनं कुसुमितं द्रष्टुं परं कौतूहलं हि मे ॥ १०२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्युमत्सेन उवाच ।

यतः प्रभृति सावित्री पित्रा दत्ता स्नुषा मम ।
नानयाभ्यर्थनायुक्तमुक्तपूर्व्वं स्मराम्यहम् ॥ १०३ ॥
तदेषा लभतां कामं यथाभिलषितं वधूः ।
अप्रमादश्च कर्त्तव्यः पुत्त्रि सत्यवतः पथि ॥ १०४ ॥

मार्कण्डेय उवाच ।

उभाभ्यामभ्यनुज्ञाता सा जगाम तपस्विनी ।
सह भर्त्रा हसन्तीव हृदयेन विदूयता ॥ १०५ ॥
सा वनानि विचित्राणि रमणीयानि सर्व्वशः ।
मयूरगणजुष्टानि ददर्श विपुलेक्षणा ॥ १०६ ॥
अथ भार्य्यासहायः स फलान्यादाय वीर्य्यवान् ।
कठिनं पूरयामास ततः काष्ठान्यपाटयत् ॥ १०७ ॥
तस्य पाटयतः काष्ठं स्वेदो वै समजायत ।
व्यायामेन च तेनास्य जज्ञे शिरसि वेदना ॥ १०८ ॥
सोऽभिगम्य प्रियां भार्य्यामुवाच श्रमपीड़ितः ।
व्यायामेन ममानेन जाता शिरसि वेदना ॥ १०९ ॥
अङ्गानि चैव सावित्रि हृदयं दूयतीव च ।
अस्वस्थमिव चात्मानं लक्षये मितभाषिणि ॥ ११० ॥
शूलैरिव शिरो विद्धमिदं संलक्षयाम्यहम् ।
तत् स्वप्तुमिच्छे कल्याणि न स्थातुं शक्तिरस्ति मे ॥ १११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा समासाद्य सावित्री भर्त्तारमुपगम्य च ।
उत्सङ्गेऽस्य शिरः कृत्वा निषसाद महीतले ॥ ११२ ॥
ततः सा नारदवचो विमृषन्ती तपस्विनी ।
तं मुहूर्त्तं क्षणं वेलां दिवसञ्च युयोज ह ॥ ११३ ॥
मुहूर्त्तादेव चापश्यत् पुरुषं रक्तवाससम् ।
बद्धमौलिं वपुष्मन्तमादित्यसमतेजसम् ॥ ११४ ॥
तं दृष्ट्वा सहसोत्थाय भर्त्तुर्न्यस्य शनैः शिरः ।
कृताञ्जलिरुवाचार्त्ता हृदयेन प्रवेपती ॥ ११५ ॥

सावित्र्युवाच ।

दैवतं त्वाभिजानामि वपुरेतद्ध्यमानुषम् ।
कामया ब्रूहि देवेश कस्त्वं किञ्च चिकीर्षसि ॥११६॥

यम उवाच ।

पतिव्रतासि सावित्री तथैव च तपोऽन्विता ।
अतस्त्वामभिभाषामि विद्धि मां त्वं शुभे यमम्॥११७॥
अयं ते सत्यवान् भर्त्ता क्षीणायुः पार्थिवात्मजः ।
नेष्याम्येनमहं बद्ध्वा विद्ध्येतन्मे चिकीर्षितम्॥ ११८ ॥

सावित्र्युवाच ।

श्रूयते भगवन् दूतास्तवागच्छन्ति मानवान् ।
नेतुं किल भवान् कस्मादागतोऽसि स्वयं प्रभो॥११९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्युक्तः पितृराजस्तां भगवान् स्वचिकीर्षितम् ।
यथावत् सर्व्वमाख्यातुं तत्प्रियार्थं प्रचक्रमे ॥ १२० ॥
अयञ्च धर्म्मसंयुक्तो रूपवान् गुणसागरः ।
नार्हो मत्पुरुषैर्नेतुमतोऽस्मि स्वयमागतः ॥ १२१ ॥
ततः सत्यवतः कायात् पाशबद्धं वशं गतम् ।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् ॥ १२२ ॥
ततः समुद्धृतप्राणं गतश्वासं हतप्रभम् ।
निर्व्विचेष्टं शरीरं तद्बभूवाप्रियदर्शनम् ॥ १२३ ॥
यमस्तु तं ततो बद्ध्वा प्रयातो दक्षिणामुखः ।
सावित्री चैव दुःखार्त्ता यममेवान्वगच्छत ।
नियमव्रतसंसिद्धा महाभागा पतिव्रता ॥ १२४ ॥

यम उवाच ।

निवर्त्त गच्छ सावित्रि कुरुष्वास्यौर्द्ध्वदेहिकम् ।
कृतं भर्त्तुस्त्वयानृण्यं यावद्गम्यं गतं त्वया ॥ १२५ ॥

सावित्र्युवाच ।

यत्र मे नीयते भर्त्ता स्वयं वा यत्र गच्छति ।
मया च तत्र गन्तव्यमेष धर्म्मः सनातनः ॥ १२६ ॥
तपसा गुरुभक्त्या च भर्त्तुः स्नेहाद्व्रतेन च ।
तव चैव प्रसादेन न मे प्रतिहता गतिः ॥ १२७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राहुः साप्तपदं मैत्रं बुधास्तत्त्वार्थदर्शिनः ।
मित्रतान्तु पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु ॥ १२८ ॥

नानात्मवन्तस्तु वने चरन्ति
धर्म्मञ्च वासञ्च परिश्रमञ्च ।
विज्ञानतो धर्म्ममुदाहरन्ति
तस्मात् सन्तो धर्म्ममाहुः प्रधानम् ॥ १२९ ॥

एकस्य धर्म्मस्य सतां मतेन
सर्व्वे स्म तं मार्गमनुप्रपन्नाः ।
मा वै द्वितीयं मा तृतीयञ्च वाञ्छेत्
तस्मात् सन्तो धर्म्ममाहुः प्रधानम् ॥ १३० ॥

यम उवाच ।

निवर्त्त तुष्टोऽस्मि तवानया गिरा
स्वराक्षरव्यञ्जनहेतुयुक्तया ।
वरं वृणीष्वेह विनास्य जीवितं
ददानि ते सर्व्वमनिन्दिते वरम् ॥ १३१ ॥

सावित्र्युवाच ।

च्युतः स्वराज्याद्वनवासमाश्रितो
विनष्टचक्षुः श्वशुरो ममाश्रमे ।
स लब्धचक्षुर्बलवान् भवेन्नृप-
स्तव प्रसादाज्ज्वलनार्कसन्निभः ॥ १३२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यम उवाच ।

ददानि तेऽहं तमनिन्दिते वरं
यथा त्वयोक्तं भविता च तत्तथा ।
तवाध्वना ग्लानिमिवोपलक्षये
निवर्त्त गच्छस्व न ते श्रमो भवेत् ॥ १३३ ॥

सावित्त्र्युवाच ।

श्रमः कुतो भर्त्तृसमीपतो हि मे
यतो हि भर्त्ता मम सा गतिर्ध्रुवा ।
यतः पतिं नेष्यसि तत्र मे गतिः
सुरेश भूयश्च वचो निबोध मे ॥ १३४ ॥
सतां सकृत्सङ्गतमीप्सितं परं
ततः परं मित्रमिति प्रचक्षते ।
न चाफलं सत्पुरुषेण सङ्गतं
ततः सतां सन्निवसेत् समागमे ॥ १३५ ॥

यम उवाच ।

मनोऽनुकूलं बुधबुद्धिवर्द्धनं
त्वया यदुक्तं वचनं हिताश्रयम् ।
विना पुनः सत्यवतोऽस्य जीवितं
वरं द्वितीयं वरयस्व भाविनि ॥ १३६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सावित्र्युवाच ।

च्युतं पुरा मे श्वशुरस्य धीमतः
स्वमेव राज्यं लभतां स पार्थिवः ।
जह्यात् स्वधर्म्मान्न च मे गुरुर्यथा
द्वितीयमेतद्वरयामि ते वरम् ॥ १३७ ॥

यम उवाच ।

स्वमेव राज्यं प्रतिपत्स्यतेऽचिरात्
न च स्वधर्म्मात् परिहास्यते नृपः ।
कृतेन कामेन मया नृपात्मजे
निवर्त्त गच्छस्व न ते श्रमो भवेत् ॥ १३८ ॥

सावित्र्युवाच ।

प्रजास्त्वयैता नियमेन संयता
नियम्य चैता नयसे निकामया ।
ततो यमत्वं तव देव विश्रुतं
निबोध चेमां गिरमीरितां मया ॥ १३९ ॥

अद्रोहः सर्व्वभूतेषु कर्म्मणा मनसा गिरा ।
अनुग्रहश्च दानञ्च सतां धर्म्मः सनातनः ॥ १४० ॥
एवंप्रायश्च लोकोऽयं मनुष्याः शक्तिपेशलाः ।
सन्तस्त्वेवाप्यमित्रेषु दयां प्राप्तेषु कुर्व्वते ॥ १४१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यम उवाच।

पिपासितस्येव भवेद्यथा पय-
स्तथा त्वया वाक्यमिदं समीरितम्।
विना पुनः सत्यवतोऽस्य जीवितं
वरं वृणीष्वेह शुभे यथेच्छसि॥ १४२॥

सावित्र्युवाच।

ममानपत्यः पृथिवीपतिः पिता
भवेत् पितुः पुत्रशतं तथौरसम्।
कुलस्य सन्तानकरञ्च यद्भवेत्
तृतीयमेतद्वरयामि ते वरम्॥ १४३॥

यम उवाच।

कुलस्य सन्तानकरं सुवर्चसं
शतं सुतानां पितुरस्तु ते शुभे।
कृतेन कामेन नराधिपात्मजे
निवर्त्त दूरं हि पथस्त्वमागता॥ १४४॥

सावित्र्युवाच।

न दूरमेतन्मम भर्त्तृसन्निधौ
मनो हि मे दूरतरं प्रधावति।
अथ व्रजन्नेव गिरं समुद्यतां
मयोच्यमानां शृणु भूय एव च॥ १४५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवस्वतस्त्वं तनयः प्रतापवान्
ततो हि वैवस्वत उच्यसे बुधैः ।
समेन धर्म्मेण च रञ्जिताः प्रजा-
स्ततस्तवेहेश्वर धर्म्मराजता ॥ १४६ ॥
आत्मन्यपि न विश्वासस्तथा भवति सत्सु यः ।
तस्मात् सत्सु विशेषेण सर्व्वः प्रणयमिच्छति ॥ १४७ ॥

यम उवाच ।

उदाहृतं ते वचनं यदङ्गने
शुभे न तादृक् त्वदृते श्रुतं मया ।
अनेन तुष्टोऽस्मि विनास्य जीवितं
वरं चतुर्थं वरयस्व गच्छ च ॥ १४८ ॥

सावित्र्युवाच ।

ममात्मजं सत्यवतस्तथौरसं
भवेदुभाभ्यामिह यत् कुलोद्वहम् ।
शतं सुतानां बलवीर्य्यशालिना-
मिदं चतुर्थं वरयामि ते वरम् ॥ १४९ ॥

यम उवाच ।

शतं सुतानां बलवीर्य्यशालिनां
भविष्यति प्रीतिकरं तवाबले ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिश्रमस्ते न भवेन्नृपात्मजे
निवर्त्त दूरं हि पथस्त्वमागता ॥ १५० ॥

सावित्र्युवाच ।

सतां सदा शाश्वतधर्म्मवृत्तिः
सन्तो न सीदन्ति न च व्यथन्ते ।
सतां सद्भिर्नाफलः सङ्गमोऽस्ति
सद्भ्यो भयं नानुवर्त्तन्ति सन्तः ॥ १५१ ॥

यम उवाच ।

यथा यथा भाषसि धर्म्मसंहितं
मनोऽनुकूलं सुपदं महार्थवत् ।
तथा तथा मे त्वयि भक्तिरुत्तमा
वरं वृणीष्वाप्रतिमं पतिव्रते ॥ १५२ ॥

सावित्र्युवाच ।

न तेऽपवर्गः सुकृताद्विनाकृतः
तथा यथान्येषु वरेषु मानद ।
वरं वृणे जीवतु सत्यवानयं
यथा मृता ह्येवमहं पतिं विना ॥ १५३ ॥
न कामये भर्त्तृविनाकृता सुखं
न कामये भर्त्तृविनाकृता दिवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कामये भर्त्तृविनाकृता श्रियं
न भर्त्तृहीना व्यवसामि जीवितुम् ॥ १५४ ॥
वरातिसर्गः शतपुत्त्रता मम
त्वयैव दत्तो ह्रियते च मे पतिः ।
वरं वृणे जीवतु सत्यवानयं
तवैव सत्यं वचनं भविष्यति ॥ १५५ ॥

मार्कण्डेय उवाच ।

तथेत्युक्त्वा तु तं पाशं मुक्त्वा वैवस्वतो यमः ।
धर्म्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत् ॥ १५६ ॥
एष भद्रे मया मुक्तो भर्त्ता ते कुलनन्दिनि ।
चतुर्वर्षशतायुश्च त्वया सार्द्धमवाप्स्यति ॥ १५७ ॥
एवं तस्यै वरं दत्त्वा धर्म्मराजः प्रतापवान् ।
निवर्त्तयित्वा सावित्रीं स्वमेव भवनं ययौ ॥ १५८ ॥

पुस्तकालय
गुरुकुल कांगड़ी

DIGITIZED C-DAC
2005-2006

10 MAR 2006

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

G.L. BONNERJEE * 9/6 PUTTOOATOLA LANE * CALCUTTA
THY WILL BE DONE

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्याल
हरिद्वार

पुस्तक लौटाने की तिथि अन्त में अङ्कि
है। इस तिथि को पुस्तक न लौटाने पर
नये पैसे प्रति पुस्तक अतिरिक्त दिनों
अर्थदण्ड लगेगा।

१००००.६.५६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तकालय, गुरुकुल कांगड़ी विश्वविद्यालय,
हरिद्वार ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Entered in Database

Signature with Date

DIGITIZED C-DAC
2005-2006

10 MAR 2006

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar